# 2 Shrimaddevibhagavatamahapurane Dvitiyah Skandhah

# ૨ શ્રીમદ્દેવીભાગવતમહાપુરાણે દ્વિતીયઃ સ્કન્ધઃ

## Document Information

Text title : Devi Bhagavata Mahapurana Skandha 02

File name : devIbhAgavatam02.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૨ શ્રીમદ્દેવીભાગવતમહાપુરાણે દ્વિતીયઃ સ્કન્ધઃ

## ૨.૧ પ્રથમોઽધ્યાયઃ । મસ્ત્યગન્ધોત્પત્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
આશ્ચર્યકરમેતત્તે વચનં ગર્ભહેતુકમ્ ।
સન્દેહોઽત્ર સમુત્પન્નઃ સર્વેષાં નસ્તપસ્વિનામ્ ॥ ૧॥

માતા વ્યાસસ્ય મેધાવિન્નામ્ના સત્યવતીતિ ચ ।
વિવાહિતા પુરા જ્ઞાતા રાજ્ઞા શન્તનુના યથા ॥ ૨॥

તસ્યાઃ પુત્રઃ કથં વ્યાસઃ સતી સ્વભવને સ્થિતા ।
ઈદૃશી સા કથં રાજ્ઞા પુનઃ શન્તનુના વૃતા ॥ ૩॥

તસ્યાં પુત્રાવુભૌ જાતૌ તત્ત્વં કથય સુવ્રત ।
વિસ્તરેણ મહાભાગ કથાં પરમપાવનીમ્ ॥ ૪॥

ઉત્પત્તિં વદ વ્યાસસ્ય સત્યવત્યાસ્તથા પુનઃ ।
શ્રોતુકામાઃ પુનઃ સર્વે ઋષયઃ સંશિતવ્રતાઃ ॥ ૫॥

સૂત ઉવાચ ।
પ્રણમ્ય પરમાં શક્તિં ચતુર્વર્ગપ્રદાયિનીમ્ ।
આદિશક્તિં વદિષ્યામિ કથાં પૌરાણિકીં શુભામ્ ॥ ૬॥

યસ્યોચ્ચારણમાત્રેણ સિદ્ધિર્ભવતિ શાશ્વતી ।
વ્યાજેનાપિ હિ બીજસ્ય વાગ્ભવસ્ય વિશેષતઃ ॥ ૭॥

સમ્યક્ સર્વાત્મના સર્વૈઃ સર્વકામાર્થસિદ્ધયે ।
સ્મર્તવ્યા સર્વથા દેવી વાઞ્છિતાર્થપ્રદાયિની ॥ ૮॥

રાજોપરિચરો નામ ધાર્મિકઃ સત્યસઙ્ગરઃ ।
ચેદિદેશપતિઃ શ્રીમાન્ બભૂવ દ્વિજપૂજકઃ ॥ ૯॥

તપસા તસ્ય તુષ્ટેન વિમાનં સ્ફાટિકં શુભમ્ ।

દત્તમિન્દ્રેણ તત્તસ્મૈ સુન્દરં પ્રિયકામ્યયા ॥ ૧૦॥

તેનારૂઢસ્તુ સર્વત્ર યાતિ દિવ્યેન ભૂપતિઃ ।
ન ભૂમાવુપરિસ્થોઽસૌ તેનોપરિચરો વસુઃ ॥ ૧૧॥

વિખ્યાતઃ સર્વલોકેષુ ધર્મનિત્યઃ સ ભૂપતિઃ ।
તસ્ય ભાર્યા વરારોહા ગિરિકા નામ સુન્દરી ॥ ૧૨॥

પુત્રાશ્ચાસ્ય મહાવીર્યાઃ પઞ્ચાસન્નમિતૌજસઃ ।
પૃથગ્દેશેષુ રાજાનઃ સ્થાપિતાસ્તેન ભૂભુજા ॥ ૧૩॥

વસોસ્તુ પત્ની ગિરિકા કામાન્ કાલે ન્યવેદયત્ ।
ઋતુકાલમનુપ્રાપ્તા સ્નાતા પુંસવને શુચિઃ ॥ ૧૪॥

તદહઃ પિતરશ્ચૈનમૂચુર્જહિ મૃગાનિતિ ।
તચ્છ્રુત્વા ચિન્તયામાસ ભાર્યામૃતુમતીં તથા ॥ ૧૫॥

પિતૃવાક્યં ગુરું મત્વા કર્તવ્યમિતિ નિશ્ચિતમ્ ।
ચચાર મૃગયાં રાજા ગિરિકાં મનસા સ્મરન્ ॥ ૧૬॥

વને સ્થિતઃ સ રાજર્ષિશ્ચિત્તે સસ્માર ભામિનીમ્ ।
અતીવ રૂપસમ્પન્નાં સાક્ષાચ્છ્રિયમિવાપરામ્ ॥ ૧૭॥

તસ્ય રેતઃ પ્રચસ્કન્દ સ્મરતસ્તાં ચ કામિનીમ્ ।
વટપત્રે તુ તદ્રાજા સ્કન્નમાત્રં સમાક્ષિપત્ ॥ ૧૮॥

ઇદં વૃથા પરિસ્કન્નં રેતો વૈ ન ભવેત્કથમ્ ।
ઋતુકાલં ચ વિજ્ઞાય મતિં ચક્રે નૃપસ્તદા ॥ ૧૯॥

અમોઘં સર્વથા વીર્યં મમ ચૈતન્ન સંશયઃ ।
પ્રિયાયૈ પ્રેષયામ્યેતદિતિ બુદ્ધિમકલ્પયત્ ॥ ૨૦॥

શુક્રપ્રસ્થાપને કાલં મહિષ્યાઃ પ્રસમીક્ષ્ય સઃ ।
અભિમન્ત્ર્યાથ તદ્વીર્યં વટપર્ણપુટે કૃતમ્ ॥ ૨૧॥

પાર્શ્વસ્થં શ્યેનમાભાષ્ય રાજોવાચ દ્વિજં પ્રતિ ।
ગૃહાણેદં મહાભાગ ગચ્છ શીઘ્રં ગૃહં મમ ॥ ૨૨॥

મત્પ્રિયાર્થમિદં સૌમ્ય ગૃહીત્વા ત્વં ગૃહં નય ।
ગિરિકાયૈ પ્રયચ્છાશુ તસ્યાસ્ત્વાર્તવમદ્ય વૈ ॥ ૨૩॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા પ્રદદૌ પર્ણં શ્યેનાય નૃપસત્તમઃ ।
સ ગૃહીત્વોત્પપાતાશુ ગગનં ગતિવિત્તમઃ ॥ ૨૪॥

ગચ્છન્તં ગગનં શ્યેનં ધૃત્વા ચઞ્ચુપુટે પુટમ્ ।
તમપશ્યદથાયાન્તં ખગં શ્યેનસ્તથાપરઃ ॥ ૨૫॥

આમિષં સ તુ વિજ્ઞાય શીઘ્રમભ્યદ્રવત્ખગમ્ ।
તુણ્ડયુદ્ધમથાકાશે તાવુભૌ સમ્પ્રચક્રતુઃ ॥ ૨૬॥

યુદ્ધ્યતોરપતદ્રેતસ્તજ્જાપિ યમુનામ્ભસિ ।
ખગૌ તૌ નિર્ગતૌ કામં પુટકે પતિતે તદા ॥ ૨૭॥

એતસ્મિન્સમયે કાચિદદ્રિકા નામ ચાપ્સરાઃ ।
બ્રાહ્મણં સમનુપ્રાપ્તં સન્ધ્યાવન્દનતત્પરમ્ ॥ ૨૮॥

કુર્વન્તી જલકેલિં સા જલે મગ્ના ચચાર સા ।
જગ્રાહ ચરણં નારી દ્વિજસ્ય વરવર્ણિની ॥ ૨૯॥

પ્રાણાયામપરઃ સોઽથ દૃષ્ટ્વા તાં કામચારિણીમ્ ।
શશાપ ભવ મત્સ્યી ત્વં ધ્યાનવિઘ્નકરી યતઃ ॥ ૩૦॥

સા શપ્તા વિપ્રમુખ્યેન બભૂવ યમુનાચરી ।
શફરી રૂપસમ્પન્ના હ્યદ્રિકા ચ વરાપ્સરાઃ ॥ ૩૧॥

શ્યેનપાદપરિભ્રષ્ટં તચ્છુક્રમથ વાસવી ।
જગ્રાહ તરસાભ્યેત્ય સાદ્રિકા મત્સ્યરૂપિણી ॥ ૩૨॥

અથ કાલેન કિયતા મત્સ્યીં તાં મત્સ્યજીવનઃ ।
સમ્પ્રાપ્તે દશમે માસિ બબન્ધ તાં મનોરમામ્ ॥ ૩૩॥

ઉદરં વિદદારાશુ સ તસ્યા મત્સ્યજીવનઃ ।
યુગ્મં વિનિઃસૃતં તસ્માદુદરાન્માનુષાકૃતિ ॥ ૩૪॥

બાલઃ કુમારઃ સુભગસ્તથા કન્યા શુભાનના ।
દૃષ્ટ્વાશ્ચર્યમિદં સોઽથ વિસ્મયં પરમં ગતઃ ॥ ૩૫॥

રાજ્ઞે નિવેદયામાસ પુત્રૌ દ્વૌ તુ ઝષોદ્ભવૌ ।
રાજાપિ વિસ્મયાવિષ્ટઃ સુતં જગ્રાહ તં શુભમ્ ॥ ૩૬॥

સ મત્સ્યો નામ રાજાસૌ ધાર્મિકઃ સત્યસઙ્ગરઃ ।

વસુપુત્રો મહાતેજાઃ પિત્રા તુલ્યપરાક્રમઃ ॥ ૩૭॥

કાલિકા વસુના દત્તા તરસા જલજીવિને ।
નામ્ના કાલીતિ વિખ્યાતા તથા મત્સ્યોદરીતિ ચ ॥ ૩૮॥

મત્સ્યગન્ધેતિ નામ્ના વૈ ગણેન સમજાયત ।
વિવર્ધમાના દાશસ્ય ગૃહે સા વાસવી શુભા ॥ ૩૯॥

ઋષય ઊચુઃ ।
અદ્રિકા મુનિના શપ્તા મત્સ્યી જાતા વરાપ્સરાઃ ।
વિદારિતા ચ દાશેન મૃતા ચ ભક્ષિતા પુનઃ ॥ ૪૦॥

કિં બભૂવ પુનસ્તસ્યા અપ્સરાયા વદસ્વ તત્ ।
શાપસ્યાન્તં કથં સૂત કથં સ્વર્ગમવાપ સા ॥ ૪૧॥

સૂત ઉવાચ ।
શપ્તા યદા સા મુનિના વિસ્મિતા સમ્બભૂવ હ ।
સ્તુતિં ચકાર વિપ્રસ્ય દીનેવ રુદતી તદા ॥ ૪૨॥

દયાવાન્બ્રાહ્મણઃ પ્રાહ તાં તદા રુદતીં સ્ત્રિયમ્ ।
મા શોકં કુરુ કલ્યાણિ શાપાન્તં તે વદામ્યહમ્ ॥ ૪૩॥

મત્ક્રોધશાપયોગેન મત્સ્યયોનિં ગતા શુભે ।
માનુષૌ જનયિત્વા ત્વં શાપમોક્ષમવાપ્સ્યસિ ॥ ૪૪॥

ઇત્યુક્ત્વા તેન સા પ્રાપ મત્સ્યદેહં નદીજલે ।
બાલકૌ જનયિત્વા સા મૃતા મુક્તા ચ શાપતઃ ॥ ૪૫॥

સન્ત્યજ્ય રૂપં મત્સ્યસ્ય દિવ્યરૂપમવાપ્ય ચ ।
જગામામરમાર્ગં ચ શાપાન્તે વરવર્ણિની ॥ ૪૬॥

એવં જાતા વરા પુત્રી મત્સ્યગન્ધા વરાનના ।
પુત્રીવ પાલ્યમાના સા દાશગેહે વ્યવર્ધત ॥ ૪૭॥

મત્સ્યગન્ધા તદા જાતા કિશોરી ચાતિસુપ્રભા ।
તસ્ય કાર્યાણિ કુર્વાણા વાસવી ચાતિસુપ્રભા ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે મસ્ત્યગન્ધોત્પત્તિવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૧॥

## ૨.૨ દ્વિતીયોઽધ્યાયઃ । વ્યાસજન્મવર્ણનમ્ ।

સૂત ઉવાચ ।
એકદા તીર્થયાત્રાયાં વ્રજન્ પારાશરો મુનિઃ ।
આજગામ મહાતેજાઃ કાલિન્દ્યાસ્તટમુત્તમમ્ ॥ ૧॥

નિષાદમાહ ધર્માત્મા કુર્વન્તં ભોજનં તદા ।
પ્રાપયસ્વ પરં પારં કાલિન્દ્યા ઉડુપેન મામ્ ॥ ૨॥

દાશઃ શ્રુત્વા મુનેર્વાક્યં કુર્વાણો ભોજનં તટે ।
ઉવાચ તાં સુતાં બાલાં મત્સ્યગન્ધાં મનોરમામ્ ॥ ૩॥

ઉડુપેન મુનિં બાલે પરં પારં નયસ્વ હ ।
ગન્તુકામોઽસ્તિ ધર્માત્મા તાપસોઽયં શુચિસ્મિતે ॥ ૪॥

ઇત્યુક્તા સા તદા પિત્રા મત્સ્યગન્ધાથ વાસવી ।
ઉડુપે મુનિમાસીનં સંવાહયતિ ભામિની ॥ ૫॥

વ્રજન્ સૂર્યસુતાતોયે ભાવિત્વાદ્દૈવયોગતઃ ।
કામાર્તસ્તુ મુનિર્જાતો દૃષ્ટ્વા તાં ચારુલોચનામ્ ॥ ૬॥

ગ્રહીતુકામઃ સ મુનિર્દૃષ્ટ્વા વ્યઞ્જિતયૌવનામ્ ।
દક્ષિણેન કરેણૈનામસ્પૃશદ્દક્ષિણે કરે ॥ ૭॥

તમુવાચાસિતાપાઙ્ગી સ્મિતપૂર્વમિદં વચઃ ।
કુલસ્ય સદૃશં વઃ કિં શ્રુતસ્ય તપસશ્ચ કિમ્ ॥ ૮॥

ત્વં વૈ વસિષ્ઠદાયાદઃ કુલશીલસમન્વિતઃ ।
કિં ચિકીર્ષસિ ધર્મજ્ઞ મન્મથેન પ્રપીડિતઃ ॥ ૯॥

દુર્લભં માનુષં જન્મ ભુવિ બ્રાહ્મણસત્તમ ।
તત્રાપિ દુર્લભં મન્યે બ્રાહ્મણત્વં વિશેષતઃ ॥ ૧૦॥

કુલેન શીલેન તથા શ્રુતેન
દ્વિજોત્તમસ્ત્વં કિલ ધર્મવિચ્ચ ।
અનાર્યભાવં કથમાગતોઽસિ
વિપ્રેન્દ્ર માં વીક્ષ્ય ચ મીનગન્ધામ્ ॥ ૧૧॥

મદીયે શરીરે દ્વિજામોઘબુદ્ધે ॥

શુભં કિં સમાલોક્ય પાણિં ગ્રહીતુમ્ ।

સમીપં સમાયાસિ કામાતુરસ્ત્વં
કથં નાભિજાનાસિ ધર્મં સ્વકીયમ્ ॥ ૧૨॥

અહો મન્દબુદ્ધિર્દ્વિજોઽયં ગ્રહીષ્ય-
ઞ્જલે મગ્ન એવાદ્ય માં વૈ ગૃહીત્વા ।
મનો વ્યાકુલં પઞ્ચબાણાતિવિદ્ધં
ન કોઽપીહ શક્તઃ પ્રતીપં હિ કર્તુમ્ ॥ ૧૩॥

ઇતિ સઞ્ચિન્ત્ય સા બાલા તમુવાચ મહામુનિમ્ ।
ધૈર્યં કુરુ મહાભાગ પરં પારં નયામિ વૈ ॥ ૧૪॥

સૂત ઉવાચ ।
પરાશરસ્તુ તચ્છ્રુત્વા વચનં હિતપૂર્વકમ્ ।
કરં ત્યક્ત્વા સ્થિતસ્તત્ર સિન્ધોઃ પારં ગતઃ પુનઃ ॥ ૧૫॥

મત્સ્યગન્ધાં પ્રજગ્રાહ મુનિઃ કામાતુરસ્તદા ।
વેપમાના તુ સા કન્યા તમુવાચ પુરઃસ્થિતમ્ ॥ ૧૬॥

દુર્ગન્ધાહં મુનિશ્રેષ્ઠ કથં ત્વં નોપશઙ્કસે ।
સમાનરૂપયોઃ કામસંયોગસ્તુ સુખાવહઃ ॥ ૧૭॥

ઇત્યુક્તેન તુ સા કન્યા ક્ષણમાત્રેણ ભામિની ।
કૃતા યોજનગન્ધા તુ સુરૂપા ચ વરાનના ॥ ૧૮॥

મૃગનાભિસુગન્ધાં તાં કૃત્વા કાન્તાં મનોહરામ્ ।
જગ્રાહ દક્ષિણે પાણૌ મુનિર્મન્મથપીડિતઃ ॥ ૧૯॥

ગ્રહીતુકામં તં પ્રાહ નામ્ના સત્યવતી શુભા ।
મુને પશ્યતિ લોકોઽયં પિતા ચૈવ તટસ્થિતઃ ॥ ૨૦॥

પશુધર્મો ન મે પ્રીતિં જનયત્યતિદારુણઃ ।
પ્રતીક્ષસ્વ મુનિશ્રેષ્ઠ યાવદ્ભવતિ યામિની ॥ ૨૧॥

રાત્રૌ વ્યવાય ઉદ્દિષ્ટો દિવા ન મનુજસ્ય હિ ।
દિવાસઙ્ગે મહાન્ દોષઃ પશ્યન્તિ કિલ માનવાઃ ॥ ૨૨॥

કામં યચ્છ મહાબુદ્ધે લોકનિન્દા દુરાસદા ।
તચ્છ્રુત્વા વચનં તસ્યા યુક્તમુક્તમુદારધીઃ ॥ ૨૩॥

નીહારં કલ્પયામાસ શીઘ્રં પુણ્યબલેન વૈ ।

નીહારે ચ સમુત્પન્ને તટેઽતિતમસા યુતે ॥ ૨૪॥

કામિની તં મુનિં પ્રાહ મૃદુપૂર્વમિદં વચઃ ।
કન્યાહં દ્વિજશાર્દૂલ ભુક્ત્વા ગન્તાસિ કામતઃ ॥ ૨૫॥

અમોઘવીર્યસ્ત્વં બ્રહ્મન્ કા ગતિર્મે ભવેદિતિ ।
પિતરં કિં બ્રવીમ્યદ્ય સગર્ભા ચેદ્ભવામ્યહમ્ ॥ ૨૬॥

ત્વં ગમિષ્યસિ ભુક્ત્વા માં કિં કરોમિ વદસ્વ તત્ ।
પરાશર ઉવાચ ।
કાન્તેઽદ્ય મત્પ્રિયં કૃત્વા કન્યૈવ ત્વં ભવિષ્યસિ ॥ ૨૭॥

વૃણીષ્વ ચ વરં ભીરુ યં ત્વમિચ્છસિ ભામિનિ ।
સત્યવત્યુવાચ ।
યથા મે પિતરૌ લોકે ન જાનીતો હિ માનદ ॥ ૨૮॥

કન્યાવ્રતં ન મે હન્યાત્તથા કુરુ દ્વિજોત્તમ ।
પુત્રશ્ચ ત્વત્સમઃ કામં ભવેદદ્ભુતવીર્યવાન્ ॥ ૨૯॥

ગન્ધોઽયં સર્વદા મે સ્યાદ્યૌવનં ચ નવં નવમ્ ।
પરાશર ઉવાચ ।
શ‍ૃણુ સુન્દરિ પુત્રસ્તે વિષ્ણ્વંશસમ્ભવઃ શુચિઃ ॥ ૩૦॥

ભવિષ્યતિ ચ વિખ્યાતસ્ત્રૈલોક્યે વરવર્ણિનિ ।
કેનચિત્કારણેનાહં જાતઃ કામાતુરસ્ત્વયિ ॥ ૩૧॥

કદાપિ ચ ન સમ્મોહો ભૂતપૂર્વો વરાનને ।
દૃષ્ટ્વા ચાપ્સરસાં રૂપં સદાહં ધૈર્યમાવહમ્ ॥ ૩૨॥

દૈવયોગેન વીક્ષ્ય ત્વાં કામસ્ય વશગોઽભવમ્ ।
તત્કિઞ્ચિત્કારણં વિદ્ધિ દૈવં હિ દુરતિક્રમમ્ ॥ ૩૩॥

દૃષ્ટ્વાહં ચાતિદુર્ગન્ધાં ત્વાં કથં મોહમાપ્નુયામ્ ।
પુરાણકર્તા પુત્રસ્તે ભવિષ્યતિ વરાનને ॥ ૩૪॥

વેદવિદ્ભાગકર્તા ચ ખ્યાતશ્ચ ભુવનત્રયે ।
સૂત ઉવાચ ।
ઇત્યુક્ત્વા તાં વશં યાતાં ભુક્ત્વા સ મુનિસત્તમઃ ॥ ૩૫॥

જગામ તરસા સ્નાત્વા કાલિન્દીસલિલે મુનિઃ ।

સાપિ સત્યવતી જાતા સદ્યો ગર્ભવતી સતી ॥ ૩૬॥

સુષુવે યમુનાદ્વીપે પુત્રં કામમિવાપરમ્ ।
જાતમાત્રસ્તુ તેજસ્વી તામુવાચ સ્વમાતરમ્ ॥ ૩૭॥

તપસ્યેવ મનઃ કૃત્વા વિવિશે ચાતિવીર્યવાન્ ।
ગચ્છ માતર્યથાકામં ગચ્છામ્યહમતઃ પરમ્ ॥ ૩૮॥

તપઃ કર્તું મહાભાગે દર્શયિષ્યામિ વૈ સ્મૃતઃ ।
માતર્યદા ભવેત્કાર્યં તવ કિઞ્ચિદનુત્તમમ્ ॥ ૩૯॥

સ્મર્તવ્યોઽહં તદા શીઘ્રમાગમિષ્યામિ ભામિનિ ।
સ્વસ્તિ તેઽસ્તુ ગમિષ્યામિ ત્યક્ત્વા ચિન્તાં સુખં વસ ॥ ૪૦॥

ઇત્યુક્ત્વા નિર્યયૌ વ્યાસઃ સાપિ પિત્રન્તિકં ગતા ।
દ્વીપે ન્યસ્તસ્તયા બાલસ્તસ્માદ્દ્વૈપાયનોઽભવત્ ॥ ૪૧॥

જાતમાત્રો જગામાશુ વૃદ્ધિં વિષ્ણ્વંશયોગતઃ ।
તીર્થે તીર્થે કૃતસ્તાનશ્ચચાર તપ ઉત્તમમ્ ॥ ૪૨॥

એવં દ્વૈપાયનો જજ્ઞે સત્યવત્યાં પરાશરાત્ ।
ચકાર વેદશાખાશ્ચ પ્રાપ્તં જ્ઞાત્વા કલેર્યુગમ્ ॥ ૪૩॥

વેદવિસ્તારકરણાદ્વ્યાસનામાભવન્મુનિઃ ।
પુરાણસંહિતાશ્ચક્રે મહાભારતમુત્તમમ્ ॥ ૪૪॥

શિષ્યાનધ્યાપયામાસ વેદાન્કૃત્વા વિભાગશઃ ।
સુમન્તું જૈમિનિં પૈલં વૈશમ્પાયનમેવ ચ ॥ ૪૫॥

અસિતં દેવલં ચૈવ શુકં ચૈવ સ્વમાત્મજમ્ ।
સૂત ઉવાચ ।
એતચ્ચ કથિતં સર્વં કારણં મુનિસત્તમાઃ ॥ ૪૬॥

સત્યવત્યાઃ સુતસ્યાપિ સમુત્પત્તિસ્તથા શુભા ।
સંશયોઽત્ર ન કર્તવ્યઃ સમ્ભવે મુનિસત્તમાઃ ॥ ૪૭॥

મહતાં ચરિતે ચૈવ ગુણા ગ્રાહ્યા મુનેરિતિ ।
કારણાચ્ચ સમુત્પત્તિઃ સત્યવત્યા ઝષોદરે ॥ ૪૮॥

પરાશરેણ સંયોગઃ પુનઃ શન્તનુના તથા ।
અન્યથા તુ મુનેશ્ચિત્તં કથં કામાકુલં ભવેત્ ॥ ૪૯॥

અનાર્યજુષ્ટં ધર્મજ્ઞઃ કૃતવાન્સ કથં મુનિઃ ।
સકારણેયમુત્પત્તિઃ કથિતાશ્ચર્યકારિણી ॥ ૫૦॥

શ્રુત્વા પાપાચ્ચ નિર્મુક્તો નરો ભવતિ સર્વથા ।
ય એતચ્છુભમાખ્યાનં શ◌ૃણોતિ શ્રુતિમાન્નરઃ ॥ ૫૧॥

ન દુર્ગતિમવાપ્નોતિ સુખી ભવતિ સર્વદા ॥ ૫૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે વ્યાસજન્મવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૨॥

## ૨.૩ તૃતીયોઽધ્યાયઃ । પ્રતીયસકાશાચ્છન્તનુજન્મવર્ણનમ્ ।

ઋષય ઊચુઃ ।
ઉત્પત્તિસ્તુ ત્વયા પ્રોક્તા વ્યાસસ્યામિતતેજસઃ ।
સત્યવત્યાસ્તથા સૂત વિસ્તરેણ ત્વયાનઘ ॥ ૧॥

તથાપ્યેકસ્તુ સન્દેહશ્ચિત્તેઽસ્માકં તુ સંસ્થિતઃ ।
ન નિવર્તતિ ધર્મજ્ઞ કથિતેન ત્વયાનઘ ॥ ૨॥

માતા વ્યાસસ્ય યા પ્રોક્તા નામ્ના સત્યવતી શુભા ।
સા કથં નૃપતિં પ્રાપ્તા શન્તનું ધર્મવિત્તમમ્ ॥ ૩॥

નિષાદપુત્રીં સ કથં ધૃતવાન્નૃપતિઃ સ્વયમ્ ।
ધર્મિષ્ઠઃ પૌરવો રાજા કુલહીનામસંવૃતામ્ ॥ ૪॥

શન્તનોઃ પ્રથમા પત્ની કા હ્યભૂત્કથયાધુના ।
ભીષ્મઃ પુત્રોઽથ મેધાવી વસોરંશઃ કથં પુનઃ ॥ ૫॥

ત્વયા પ્રોક્તં પુરા સૂત રાજા ચિત્રાઙ્ગદઃ કૃતઃ ।
સત્યવત્યાઃ સુતો વીરો ભીષ્મેણામિતતેજસા ॥ ૬॥

ચિત્રાઙ્ગદે હતે વીરે કૃતસ્તદનુજસ્તથા ।
વિચિત્રવીર્યનામાસૌ સત્યવત્યાઃ સુતો નૃપઃ ॥ ૭॥

જ્યેષ્ઠે ભીષ્મે સ્થિતે પૂર્વં ધર્મિષ્ઠે રૂપવત્યપિ ।
કૃતવાન્સ કથં રાજ્યં સ્થાપિતસ્તેન જાનતા ॥ ૮॥

મૃતે વિચિત્રવીર્યે તુ સત્યવત્યતિદુઃખિતા ।

વધૂભ્યાં ગોલકૌ પુત્રૌ જનયામાસ સા કથમ્ ॥ ૯॥

કથં રાજ્યં ન ભીષ્માય દદૌ સા વરવર્ણિની ।
ન કૃતસ્તુ કથં તેન વીરેણ દારસઙ્ગ્રહઃ ॥ ૧૦॥

અધર્મસ્તુ કૃતઃ કસ્માદ્વ્યાસેનામિતતેજસા ।
જ્યેષ્ઠેન ભ્રાતૃભાર્યાયાં પુત્રાવુત્પાદિતાવિતિ ॥ ૧૧॥

પુરાણકર્તા ધર્માત્મા સ કથં કૃતવાન્મુનિઃ ।
સેવનં પરદારાણાં ભ્રાતુશ્ચૈવ વિશેષતઃ ॥ ૧૨॥

જુગુપ્સિતમિદં કર્મ સ કથં કૃતવાન્મુનિઃ ।
શિષ્ટાચારઃ કથં સૂત વેદાનુમિતિકારકઃ ॥ ૧૩॥

વ્યાસશિષ્યોઽસિ મેધાવિન્ સન્દેહં છેત્તુમર્હસિ ।
શ્રોતુકામા વયં સર્વે ધર્મક્ષેત્રે કૃતક્ષણાઃ ॥ ૧૪॥

સૂત ઉવાચ ।
ઇક્ષ્વાકુવંશપ્રભવો મહાભિષ ઇતિ સ્મૃતઃ ।
સત્યવાન્ધર્મશીલશ્ચ ચક્રવર્તી નૃપોત્તમઃ ॥ ૧૫॥

અશ્વમેધસહસ્રેણ વાજપેયશતેન ચ ।
તોષયામાસ દેવેન્દ્રં સ્વર્ગં પ્રાપ મહામતિઃ ॥ ૧૬॥

એકદા બ્રહ્મસદનં ગતો રાજા મહાભિષઃ ।
સુરાઃ સર્વે સમાજગ્મુઃ સેવનાર્થં પ્રજાપતિમ્ ॥ ૧૭॥

ગઙ્ગા મહાનદી તત્ર સંસ્થિતા સેવિતું વિભુમ્ ।
તસ્યા વાસઃ સમુદ્ધૂતં મારુતેન તરસ્વિના ॥ ૧૮॥

અધોમુખાઃ સુરાઃ સર્વે ન વિલોક્યૈવ તાં સ્થિતાઃ ।
રાજા મહાભિષસ્તાં તુ નિઃશઙ્કઃ સમપશ્યત ॥ ૧૯॥

સાપિ તં પ્રેમસંયુક્તં નૃપં જ્ઞાતવતી નદી ।
દૃષ્ટ્વા તૌ પ્રેમસંયુક્તૌ નિર્લજ્જૌ કામમોહિતૌ ॥ ૨૦॥

બ્રહ્મા ચુકોપ તૌ તૂર્ણં શશાપ ચ રુષાન્વિતઃ ।
મર્ત્યલોકેષુ ભૂપાલ જન્મ પ્રાપ્ય પુનર્દિવમ્ ॥ ૨૧॥

પુણ્યેન મહતાવિષ્ટસ્ત્વમવાપ્સ્યસિ સર્વથા ।
ગઙ્ગાં તથોક્તવાન્બ્રહ્મા વીક્ષ્ય પ્રેમવતીં નૃપે ॥ ૨૨॥

વિમનસ્કૌ તુ તૌ તૂર્ણં નિઃસૃતૌ બ્રહ્મણોઽન્તિકાત્ ।
સ નૃપાંશ્ચિન્તયિત્વાથ ભૂર્લોકે ધર્મતત્પરાન્ ॥ ૨૩॥

પ્રતીપં ચિન્તયામાસ પિતરં પુરુવંશજમ્ ।
એતસ્મિન્સમયે ચાષ્ટૌ વસવઃ સ્ત્રીસમન્વિતાઃ ॥ ૨૪॥

વસિષ્ઠસ્યાશ્રમં પ્રાપ્તા રમમાણા યદૃચ્છયા ।
પૃથ્વાદીનાં વસૂનાં ચ મધ્યે કોઽપિ વસૂત્તમઃ ॥ ૨૫॥

દ્યૌર્નામા તસ્ય ભાર્યાથ નન્દિનીં ગાં દદર્શ હ ।
દૃષ્ટ્વા પતિં સા પપ્રચ્છ કસ્યેયં ધેનુરુત્તમા ॥ ૨૬॥

દ્યૌસ્તામાહ વસિષ્ઠસ્ય ગૌરિયં શ‍ૃણુ સુન્દરિ ।
દુગ્ધમસ્યાઃ પિબેદ્યસ્તુ નારી વા પુરુષોઽથ વા ॥ ૨૭॥

અયુતાયુર્ભવેન્નૂનં સદૈવાગતયૌવનઃ ।
તચ્છ્રુત્વા સુન્દરી પ્રાહ મૃત્યુલોકેઽસ્તિ મે સખી ॥ ૨૮॥

ઉશીનરસ્ય રાજર્ષેઃ પુત્રી પરમશોભના ।
તસ્યા હેતોર્મહાભાગ સવત્સાં ગાં પયસ્વિનીમ્ ॥ ૨૯॥

આનયસ્વાશ્રમં શ્રેષ્ઠં નન્દિનીં કામદાં શુભામ્ ।
યાવદસ્યાઃ પયઃ પીત્વા સખી મમ સદૈવ હિ ॥ ૩૦॥

માનુષેષુ ભવેદેકા જરારોગવિવર્જિતા ।
તચ્છ્રુત્વા વચનં તસ્યા દ્યૌર્જહાર ચ નન્દિનીમ્ ॥ ૩૧॥

અવમન્ય મુનિં દાન્તં પૃથ્વાદ્યૈઃ સહિતોઽનઘઃ ।
હૃતાયામથ નન્દિન્યાં વસિષ્ઠસ્તુ મહાતપાઃ ॥ ૩૨॥

આજગામાશ્રમપદં ફલાન્યાદાય સત્વરઃ ।
નાપશ્યત યદા ધેનું સવત્સાં સ્વાશ્રમે મુનિઃ ॥ ૩૩॥

મૃગયામાસ તેજસ્વી ગહ્વરેષુ વનેષ્વપિ ।
નાસાદિતા યદા ધેનુશ્ચુકોપાતિશયં મુનિઃ ॥ ૩૪॥

વારુણિશ્ચાપિ વિજ્ઞાય ધ્યાનેન વસુભિર્હૃતામ્ ।
વસુભિર્મે હૃતા ધેનુર્યસ્માન્મામવમન્ય વૈ ॥ ૩૫॥

તસ્માત્સર્વે જનિષ્યન્તિ માનુષેષુ ન સંશયઃ ।

એવં શશાપ ધર્માત્મા વસૂંસ્તાન્વારુણિઃ સ્વયમ્ ॥ ૩૬॥

શ્રુત્વા વિમનસઃ સર્વે પ્રયયુર્દુઃખિતાશ્ચ તે ।
શપ્તાઃ સ્મ ઇતિ જાનન્ત ઋષિં તમુપચક્રમુઃ ॥ ૩૭॥

પ્રસાદયન્તસ્તમૃષિં વસવઃ શરણં ગતાઃ ।
મુનિસ્તાનાહ ધર્માત્મા વસૂન્દીનાન્પુરઃસ્થિતાન્ ॥ ૩૮॥

અનુસંવત્સરં સર્વે શાપમોક્ષમવાપ્સ્યથ ।
યેનેયં વિહૃતા ધેનુર્નન્દિની મમ વત્સલા ॥ ૩૯॥

તસ્માદ્વ્યૌર્માનુષે દેહે દીર્ઘકાલં વસિષ્યતિ ।
તે શપ્તાઃ પથિ ગચ્છન્તીં ગઙ્ગાં દૃષ્ટ્વા સરિદ્વરામ્ ॥ ૪૦॥

ઊચુસ્તાં પ્રણતાઃ સર્વે શપ્તાં ચિન્તાતુરાં નદીમ્ ।
ભવિષ્યામો વયં દેવિ કથં દેવાઃ સુધાશનાઃ ॥ ૪૧॥

માનુષાણાં ચ જઠરે ચિન્તેય મહતી હિ નઃ ।
તસ્માત્ત્વં માનુષી ભૂત્વા જનયાસ્માન્સરિદ્વરે ॥ ૪૨॥

શન્તનુર્નામ રાજર્ષિસ્તસ્ય ભાર્યા ભવાનઘે ।
જાતાઞ્જાતાઞ્જલે ચાસ્માન્નિક્ષિપસ્વ સુરાપગે ॥ ૪૩॥

એવં શાપવિનિર્મોક્ષો ભવિતા નાત્ર સંશયઃ ।
તથેત્યુક્તાશ્ચ તે સર્વે જગ્મુર્લોકં સ્વકં પુનઃ ॥ ૪૪॥

ગઙ્ગાપિ નિર્ગતા દેવી ચિન્ત્યમાના પુનઃ પુનઃ ।
મહાભિષો નૃપો જાતઃ પ્રતીપસ્ય સુતસ્તદા ॥ ૪૫॥

શન્તનુર્નામ રાજર્ષિર્ધર્માત્મા સત્યસઙ્ગરઃ ।
પ્રતીપસ્તુ સ્તુતિં ચક્રે સૂર્યસ્યામિતતેજસઃ ॥ ૪૬॥

તદા ચ સલિલાત્તસ્માન્નિઃસૃતા વરવર્ણિની ।
દક્ષિણં શાલસઙ્કાશમૂરું ભેજે શૂભાનના ॥ ૪૭॥

અઙ્કે સ્થિતાં સ્ત્રિયં ચાહ મા પૃષ્ટ્વા કિં વરાનને ।
મમોરાવાસ્થિતાસિ ત્વં કિમર્થં દક્ષિણે શુભે ॥ ૪૮॥

સા તમાહ વરારોહા યદર્થં રાજસત્તમ ।
સ્થિતાત્મ્યઙ્કે કુરુશ્રેષ્ઠ કામયાનાં ભજસ્વ મામ્ ॥ ૪૯॥

તામવોચદથો રાજા રૂપયૌવનશાલિનીમ્ ।
નાહં પરસ્ત્રિયં કામાદ્ગચ્છેયં વરવર્ણિનીમ્ ॥ ૫૦॥

સ્થિતા દક્ષિણમૂરું મે ત્વમાશ્લિષ્ય ચ ભામિનિ ।
અપત્યાનાં સ્નુષાણાં ચ સ્થાનં વિદ્ધિ શુચિસ્મિતે ॥ ૫૧॥

સ્નુષા મે ભવ કલ્યાણિ જાતે પુત્રેઽતિવાઞ્છિતે ।
ભવિષ્યતિ ચ મે પુત્રસ્તવ પુણ્યાન્ન સંશયઃ ॥ ૫૨॥

તથેત્યુક્ત્વા ગતા સા વૈ કામિની દિવ્યદર્શના ।
રાજા ચાપિ ગૃહં પ્રાપ્તશ્ચિન્તયંસ્તાં સ્ત્રિયં પુનઃ ॥ ૫૩॥

તતઃ કાલેન કિયતા જાતે પુત્રે વયસ્વિનિ ।
વનં જિગમિષૂ રાજા પુત્રં વૃત્તાન્તમૂચિવાન્ ॥ ૫૪॥

વૃત્તાન્તં કથયિત્વા તુ પુનરૂચે નિજં સુતમ્ ।
યદિ પ્રયાતિ સા બાલા ત્વાં વને ચારુહાસિની ॥ ૫૫॥

કામયાના વરારોહા તાં ભજેથા મનોરમામ્ ।
ન પ્રષ્ટવ્યા ત્વયા કાસિ મન્નિયોગાન્નરાધિપ ॥ ૫૬॥

ધર્મપત્નીં ચ તાં કૃત્વા ભવિતા ત્વં સુખી કિલ ।
સૂત ઉવાચ ।
એવં સન્દિશ્ય તં પુત્રં ભૂપતિઃ પ્રીતમાનસઃ ॥ ૫૭॥

દત્ત્વા રાજ્યશ્રિયં સર્વાં વનં રાજા વિવેશ હ ।
તત્રાપિ ચ તપસ્તપ્ત્વા સમારાધ્ય પરામ્બિકામ્ ॥ ૫૮॥

જગામ સ્વર્ગં રાજાસૌ દેહં ત્યક્ત્વા સ્વતેજસા ।
રાજ્યં પ્રાપ મહાતેજાઃ શન્તનુઃ સાર્વભૌમિકમ્ ॥ ૫૯॥

પ્રજાં વૈ પાલયામાસ ધર્મદણ્ડો મહીપતિઃ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં દ્વિતીયસ્કન્ધે
પ્રતીપસકાશાચ્છન્તનુજન્મવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૩॥

## ૨.૪ ચતુર્થોઽધ્યાયઃ । દેવવ્રતોત્પત્તિવર્ણનમ્ ।

સૂત ઉવાચ ।
પ્રતીપેઽથ દિવં યાતે શન્તનુઃ સત્યવિક્રમઃ ।

બભૂવ મૃગયાશીલો નિઘ્નન્વ્યાઘ્રાન્મૃગાન્નૃપઃ ॥ ૧॥

સ કદાચિદ્વને ઘોરે ગઙ્ગાતીરે ચરન્નૃપઃ ।
દદર્શ મૃગશાવાક્ષીં સુન્દરીં ચારુભૂષણામ્ ॥ ૨॥

દૃષ્ટ્વા તાં નૃપતિર્મગ્નઃ પિત્રોક્તેયં વરાનના ।
રૂપયૌવનસમ્પન્ના સાક્ષાલ્લક્ષ્મીરિવાપરા ॥ ૩॥

પિબન્મુખામ્બુજં તસ્યા ન તૃપ્તિમગમન્નૃપઃ ।
હૃષ્ટરોમાભવત્તત્ર વ્યામચિત્ત ઇવાનઘ ॥ ૪॥

મહાભિષં સાપિ મત્વા પ્રેમયુક્તા બભૂવ હ ।
કિઞ્ચિન્મન્દસ્મિતં કૃત્વા તસ્થાવગ્રે નૃપસ્ય ચ ॥ ૫॥

વીક્ષ્ય તામસિતાપાઙ્ગીં રાજા પ્રીતમના ભૃશમ્ ।
ઉવાચ મધુરં વાક્યં સાન્ત્વયન્ શ્લક્ષ્ણયા ગિરા ॥ ૬॥

દેવી વા ત્વં ચ વામોરુ માનુષી વા વરાનને ।
ગન્ધર્વી વાથ યક્ષી વા નાગકન્યાપ્સરાપિ વા ॥ ૭॥

યાસિ કાસિ વરારોહે ભાર્યા મે ભવ સુન્દરિ ।
પ્રેમયુક્તસ્મિતૈવ ત્વં ધર્મપત્ની ભવાદ્ય મે ॥ ૮॥

સૂત ઉવાચ ।
રાજા તાં નાભિજાનાતિ ગઙ્ગેયમિતિ નિશ્ચિતમ્ ।
મહાભિષં સમુત્પન્નં નૃપં જાનાતિ જાહ્નવી ॥ ૯॥

પૂર્વપ્રેમસમાયોગાચ્છ્રુત્વા વાચં નૃપસ્ય તામ્ ।
ઉવાચ નારી રાજાનં સ્મિતપૂર્વમિદં વચઃ ॥ ૧૦॥

સ્ત્ર્યુવાચ ।
જાનામિ ત્વાં નૃપશ્રેષ્ઠ પ્રતીપતનયં શુભમ્ ।
કા ન વાઞ્છતિ ચાર્વઙ્ગી ભાવિત્વાત્સદૃશં પતિમ્ ॥ ૧૧॥

વાગ્બન્ધેન નૃપશ્રેષ્ઠ વરિષ્યામિ પતિં કિલ ।
શૃણુ મે સમયં રાજન્ વૃણોમિ ત્વાં નૃપોત્તમ ॥ ૧૨॥

યચ્ચ કુર્યામહં કાર્યં શુભં વા યદિ વાશુભમ્ ।
ન નિષેધ્યા ત્વયા રાજન્ન વક્તવ્યં તથાપ્રિયમ્ ॥ ૧૩॥

યદા ચ ત્વં નૃપશ્રેષ્ઠ ન કરિષ્યસિ મે વચઃ ।

તદા મુક્ત્વા ગમિષ્યામિ યથેષ્ટદેશં મારિષ ॥ ૧૪॥

સ્મૃત્વા જન્મ વસૂનાં સા પ્રાર્થનાપૂર્વકં હૃદિ ।
મહાભિષસ્ય પ્રેમાથ વિચિન્ત્યૈવ ચ જાહ્નવી ॥ ૧૫॥

તથેત્યુક્ત્વાથ સા દેવી ચકાર નૃપતિં પતિમ્ ।
એવં વૃતા નૃપેણાથ ગઙ્ગા માનુષરૂપિણી ॥ ૧૬॥

નૃપસ્ય મન્દિરં પ્રાપ્તા સુભગા વરવર્ણિની ।
નૃપતિસ્તાં સમાસાદ્ય ચિક્રીડોપવને શુભે ॥ ૧૭॥

સાપિ તં રમયામાસ ભાવજ્ઞા વૈ વરાઙ્ગના ।
ન બુબોધ નૃપઃ ક્રીડન્ગતાન્વર્ષગણાનથ ॥ ૧૮॥

સ તયા મૃગશાવાક્ષ્યા શચ્યા શતક્રતુર્યથા ।
સા સર્વગુણસમ્પન્ના સોઽપિ કામવિચક્ષણઃ ॥ ૧૯॥

રેમાતે મન્દિરે દિવ્યે રમાનારાયણાવિવ ।
એવં ગચ્છતિ કાલે સા દધાર નૃપતેસ્તદા ॥ ૨૦॥

ગર્ભં ગઙ્ગા વસું પુત્રં સુષુવે ચારુલોચના ।
જાતમાત્રં સુતં વારિ ચિક્ષેપૈવં દ્વિતીયકે ॥ ૨૧॥

તૃતીયેઽથ ચતુર્થેઽથ પઞ્ચમે ષષ્ઠ એવ ચ ।
સપ્તમે વા હતે પુત્રે રાજા ચિન્તાપરોઽભવત્ ॥ ૨૨॥

કિં કરોમ્યદ્ય વંશો મે કથં સ્યાત્સુસ્થિરો ભુવિ ।
સપ્ત પુત્રા હતા નૂનમનયા પાપરૂપયા ॥ ૨૩॥

નિવારયામિ યદિ માં ત્યક્ત્વા યાસ્યતિ સર્વથા ।
અષ્ટમોઽયં સુસમ્પ્રાપ્તો ગર્ભો મે મનસીપ્સિતઃ ॥ ૨૪॥

ન વારયામિ ચેદદ્ય સર્વથેયં જલે ક્ષિપેત્ ।
ભવિતા વા ન વા ચાગ્રે સંશયોઽયં મમાદ્ભુતઃ ॥ ૨૫॥

સમ્ભવેઽપિ ચ દૃષ્ટેયં રક્ષયેદ્વા ન રક્ષયેત્ ।
એવં સંશયિતે કાર્યે કિં કર્તવ્યં મયાધુના ॥ ૨૬॥

વંશસ્ય રક્ષણાર્થં હિ યત્નઃ કાર્યઃ પરો મયા ।
તતઃ કાલે યદા જાતઃ પુત્રોઽયમષ્ટમો વસુઃ ॥ ૨૭॥

મુનેર્યેન હૃતા ધેનુર્નન્દિની સ્ત્રીજિતેન હિ ।
તં દૃષ્ટ્વા નૃપતિઃ પુત્રં તામુવાચ પતન્પદે ॥ ૨૮॥

દાસોઽસ્મિ તવ તન્વઙ્ગિ પ્રાર્થયામિ શુચિસ્મિતે ।
પુત્રમેકં પુષામ્યેનં દેહિ જીવિતમદ્ય મે ॥ ૨૯॥

હિંસિતાઃ સપ્ત પુત્રા મે કરભોરુ ત્વયા શુભાઃ ।
અષ્ટમં રક્ષ સુશ્રોણિ પતામિ તવ પાદયોઃ ॥ ૩૦॥

અન્યદ્વૈ પ્રાર્થિતં તેઽદ્ય દદામ્યથ ચ દુર્લભમ્ ।
વંશો મે રક્ષણીયોઽદ્ય ત્વયા પરમશોભને ॥ ૩૧॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગે વેદવિદો વિદુઃ ।
તસ્માદદ્ય વરારોહે પ્રાર્થયામ્યષ્ટમં સુતમ્ ॥ ૩૨॥

ઇત્યુક્તાપિ ગૃહીત્વા તં યદા ગન્તું સમુત્સુકા ।
તદાતિકુપિતો રાજા તામુવાચાતિદુઃખિતઃ ॥ ૩૩॥

પાપિષ્ઠે કિં કરોમ્યદ્ય નિરયાન્ન બિભેષિ કિમ્ ।
કાસિ પાપકરાણાં ત્વં પુત્રી પાપરતા સદા ॥ ૩૪॥

યથેચ્છં ગચ્છ વા તિષ્ઠ પુત્રો મે સ્થીયતામિહ ।
કિં કરોમિ ત્વયા પાપે વંશાન્તકરયાનયા ॥ ૩૫॥

એવં વદતિ ભૂપાલે સા ગૃહીત્વા સુતં શિશુમ્ ।
ગચ્છન્તી વચનં કોપસંયુતા તમુવાચ હ ॥ ૩૬॥

પુત્રકામા સુતં ત્વેનં પાલયામિ વને ગતા ।
સમયો મે ગમિષ્યામિ વચનં હ્યન્યથાકૃતમ્ ॥ ૩૭॥

ગઙ્ગાં માં વૈ વિજાનીહિ દેવકાર્યાર્થમાગતામ્ ।
વસવસ્તુ પુરા શપ્તા વસિષ્ઠેન મહાત્મના ॥ ૩૮॥

વ્રજન્તુ માનુષીં યોનિં સ્થિતાં ચિન્તાતુરાસ્તુ મામ્ ।
દૃષ્ટ્વેદં પ્રાર્થયામાસુર્જનની નો ભવાનઘે ॥ ૩૯॥

તેભ્યો દત્ત્વા વરં જાતા પત્ની તે નૃપસત્તમ ।
દેવકાર્યાર્થસિદ્ધ્યર્થં જાનીહિ સમ્ભવો મમ ॥ ૪૦॥

સપ્ત તે વસવઃ પુત્રા મુક્તાઃ શાપાદૃષેસ્તુ તે ।
કિયન્તં કાલમેકોઽયં તવ પુત્રો ભવિષ્યતિ ॥ ૪૧॥

ગઙ્ગાદત્તમિમં પુત્રં ગૃહાણ શન્તનો સ્વયમ્ ।
વસું દેવં વિદિત્વૈનં સુખં ભુઙ્ક્ષ્વ સુતોદ્ભવમ્ ॥ ૪૨॥

ગાઙ્ગેયોઽયં મહાભાગ ભવિષ્યતિ બલાધિકઃ ।
અથ તત્ર નયામ્યેનં યત્ર ત્વં વૈ મયા વૃતઃ ॥ ૪૩॥

દાસ્યામિ યૌવનપ્રાપ્તં પાલયિત્વા મહીપતે ।
ન માતૃરહિતઃ પુત્રો જીવેન્ન ચ સુખી ભવેત્ ॥ ૪૪॥

ઇત્યુક્ત્વાન્તર્દધે ગઙ્ગા તં ગૃહીત્વા ચ બાલકમ્ ।
રાજા ચાતીવ દુઃખાર્તઃ સંસ્થિતો નિજમન્દિરે ॥ ૪૫॥

ભાર્યાવિરહજં દુઃખં તથા પુત્રસ્ય ચાદ્ભુતમ્ ।
સર્વદા ચિન્તયન્નાસ્તે રાજ્યં કુર્વન્મહીપતિઃ ॥ ૪૬॥

એવં ગચ્છતિ કાલેઽથ નૃપતિર્મૃગયાં ગતઃ ।
નિઘ્નન્મૃગગણાન્બાણૈર્મહિષાન્સૂકરાનપિ ॥ ૪૭॥

ગઙ્ગાતીરમનુપ્રાપ્તઃ સ રાજા શન્તનુસ્તદા ।
નદીં સ્તોકજલાં દૃષ્ટ્વા વિસ્મિતઃ સ મહીપતિઃ ॥ ૪૮॥

તત્રાપશ્યત્કુમારં તં મુઞ્ચન્તં વિશિખાન્બહૂન્ ।
આકૃષ્ય ચ મહાચાપં ક્રીડન્તં સરિતસ્તટે ॥ ૪૯॥

તં વીક્ષ્ય વિસ્મિતો રાજા ન સ્મ જાનાતિ કિઞ્ચન ।
નોપલેભે સ્મૃતિં ભૂપઃ પુત્રોઽયં મમ વા ન વા ॥ ૫૦॥

દૃષ્ટ્વાપ્યમાનુષં કર્મ બાણેષુ લઘુહસ્તતામ્ ।
વિદ્યાં વાપ્રતિમાં રૂપં તસ્ય વૈ સ્મરસન્નિભમ્ ॥ ૫૧॥

પપ્રચ્છ વિસ્મિતો રાજા કસ્ય પુત્રોઽસિ ચાનઘ ।
નોવાચ કિઞ્ચિદ્વીરોઽસૌ મુઞ્ચઞ્છિલીમુખાનથ ॥ ૫૨॥

અન્તર્ધાનં ગતઃ સોઽથ રાજા ચિન્તાતુરોઽભવત્ ।
કોઽયં મમ સુતો બાલઃ કિં કરોમિ વ્રજામિ કમ્ ॥ ૫૩॥

ગઙ્ગાં તુષ્ટાવ ભૂપાલઃ સ્થિતસ્તત્ર સમાહિતઃ ।
દર્શનં સા દદૌ ચાથ ચારુરૂપા યથા પુરા ॥ ૫૪॥

દૃષ્ટ્વા તાં ચારુસર્વાઙ્ગીં બભાષે નૃપતિઃ સ્વયમ્ ।

કોઽયં ગઙ્ગે ગતો બાલો મમ ત્વં દર્શયાધુના ॥ ૫૫॥

ગઙ્ગોવાચ ।
પુત્રોઽયં તવ રાજેન્દ્ર રક્ષિતશ્ચાષ્ટમો વસુઃ ।
દદામિ તવ હસ્તે તુ ગાઙ્ગેયોઽયં મહાતપાઃ ॥ ૫૬॥

કીર્તિકર્તા કુલસ્યાસ્ય ભવિતા તવ સુવ્રત ।
પાઠિતસ્ત્વખિલાન્વેદાન્ધનુર્વેદં ચ શાશ્વતમ્ ॥ ૫૭॥

વસિષ્ઠસ્યાશ્રમે દિવ્યે સંસ્થિતોઽયં સુતસ્તવ ।
સર્વવિદ્યાવિધાનજ્ઞઃ સર્વાર્થકુશલઃ શુચિઃ ॥ ૫૮॥

યદ્વેદ જામદગ્ન્યોઽસૌ તદ્વેદાયં સુતસ્તવ ।
ગૃહાણ ગચ્છ રાજેન્દ્ર સુખી ભવ નરાધિપ ॥ ૫૯॥

ઇત્યુક્ત્વાન્તર્દધે ગઙ્ગા દત્ત્વા પુત્રં નૃપાય વૈ ।
નૃપતિસ્તુ મુદા યુક્તો બભૂવાતિસુખાન્વિતઃ ॥ ૬૦॥

સમાલિઙ્ગ્ય સુતં રાજા સમાઘ્રાય ચ મસ્તકમ્ ।
સમારોપ્ય રથે પુત્રં સ્વપુરં સ પ્રચક્રમે ॥ ૬૧॥

ગત્વા ગજાહ્વયં રાજા ચકારોત્સવમુત્તમમ્ ।
દૈવજ્ઞં ચ સમાહૂય પપ્રચ્છ ચ શુભં દિનમ્ ॥ ૬૨॥

સમાહૃત્ય પ્રજાઃ સર્વાઃ સચિવાન્સર્વશઃ શુભાન્ ।
યૌવરાજ્યેઽથ ગાઙ્ગેયં સ્થાપયામાસ પાર્થિવઃ ॥ ૬૩॥

કૃત્વા તં યુવરાજાનં પુત્રં સર્વગુણાન્વિતમ્ ।
સુખમાસ સ ધર્માત્મા ન સસ્માર ચ જાહ્નવીમ્ ॥ ૬૪॥

સૂત ઉવાચ ।
એતદ્વઃ કથિતં સર્વં કારણં વસુશાપજમ્ ।
ગાઙ્ગેયસ્ય તથોત્પત્તિં જાહ્નવ્યાઃ સમ્ભવં તથા ॥ ૬૫॥

ગઙ્ગાવતરણં પુણ્યં વસૂનાં સમ્ભવં તથા ।
યઃ શ‍ૃણોતિ નરઃ પાપાન્મુચ્યતે નાત્ર સંશયઃ ॥ ૬૬॥

પુણ્યં પવિત્રમાખ્યાનં કથિતં મુનિસત્તમાઃ ।
યથા મયા શ્રુતં વ્યાસાત્પુરાણં વેદસમ્મિતમ્ ॥ ૬૭॥

શ્રીમદ્ભાગવતં પુણ્યં નાનાખ્યાનકથાન્વિતમ્ ।

દ્વૈપાયનમુખોદ્ભૂતં પઞ્ચલક્ષણસંયુતમ્ ॥ ૬૮॥

શ‍ૃણ્વતાં સર્વપાપઘ્નં શુભદં સુખદં તથા ।
ઇતિહાસમિમં પુણ્યં કીર્તિતં મુનિસત્તમાઃ ॥ ૬૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે દેવવ્રતોત્પત્તિવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૪॥

## ૨.૫ પઞ્ચમોઽધ્યાયઃ । દેવવ્રતપ્રતિજ્ઞાવર્ણનમ્ ।

ઋષય ઊચુઃ ।
વસૂનાં સમ્ભવઃ સૂત કથિતઃ શાપકારણાત્ ।
ગાઙ્ગેયસ્ય તથોત્પત્તિઃ કથિતા લોમહર્ષણે ॥ ૧॥

માતા વ્યાસસ્ય ધર્મજ્ઞ નામ્ના સત્યવતી સતી ।
કથં શન્તનુના પ્રાપ્તા ભાર્યા ગન્ધવતી શુભા ॥ ૨॥

તન્મમાચક્ષ્વ વિસ્તારં દાશપુત્રી કથં ધૃતા ।
રાજ્ઞા ધર્મવરિષ્ઠેન સંશયં છિન્ધિ સુવ્રત ॥ ૩॥

સૂત ઉવાચ ।
શન્તનુર્નામ રાજર્ષિર્મૃગયાનિરતઃ સદા ।
વનં જગામ નિઘ્નન્વૈ મૃગાંશ્ચ મહિષાન્ રુરૂન્ ॥ ૪॥

ચત્વાર્યેવ તુ વર્ષાણિ પુત્રેણ સહ ભૂપતિઃ ।
રમમાણઃ સુખં પ્રાપ કુમારેણ યથા હરઃ ॥ ૫॥

એકદા વિક્ષિપન્બાણાન્વિનિઘ્નન્ખડ્ગસૂકરાન્ ।
સ કદાચિદ્વનં પ્રાપ્તઃ કાલિન્દીં સરિતાં વરામ્ ॥ ૬॥

મહીપતિરનિર્દેશ્યમાજિઘ્રદ્ગન્ધમુત્તમમ્ ।
તસ્ય પ્રભવમન્વિચ્છન્સઞ્ચચાર વનં તદા ॥ ૭॥

ન મન્દારસ્ય ગન્ધોઽયં મૃગનાભિમદસ્ય ન ।
ચમ્પકસ્ય ન માલત્યા ન કેતક્યા મનોહરઃ ॥ ૮॥

ન ચાનુભૂતપૂર્વોઽયં વાતિ ગન્ધવહઃ શુભઃ ।
કુતોઽયમેતિ વાયુર્વૈ મમ ઘ્રાણવિમોહનઃ ॥ ૯॥

ઇતિ સઞ્ચિન્ત્યમાનોઽસૌ બભ્રામ વનમણ્ડલમ્ ।

મોહિતો ગન્ધલોભેન શન્તનુઃ પવનાનુગઃ ॥ ૧૦॥

સ દદર્શ નદીતીરે સંસ્થિતાં ચારુદર્શનામ્ ।
શ‍ૃઙ્ગારરહિતાં કાન્તાં સુસ્થિતાં મલિનામ્બરામ્ ॥ ૧૧॥

દૃષ્ટ્વા તામસિતાપાઙ્ગીં વિસ્મિતઃ સ મહીપતિઃ ।
અસ્યા દેહસ્ય ગન્ધોઽયમિતિ સઞ્જાતનિશ્ચયઃ ॥ ૧૨॥

તદદ્ભુતં રૂપમતીવ સુન્દરં
તથૈવ ગન્ધોઽખિલલોકસમ્મતઃ ।
વયશ્ચ તાદૃઙ્ નવયૌવનં શુભં
દૃષ્ટ્વૈવ રાજા કિલ વિસ્મિતોઽભવત્ ॥ ૧૩॥

કેયં કુતો વા સમુપાગતાધુના
દેવાઙ્ગના વા કિમુ માનુષી વા ।
ગન્ધર્વપુત્રી કિલ નાગકન્યા
જાને કથં ગન્ધવતીં નુ કામિનીમ્ ॥ ૧૪॥

સઞ્ચિન્ત્ય ચૈવં મનસા નૃપોઽસૌ
ન નિશ્ચયં પ્રાપ યદા તતઃ સ્વયમ્ ।
ગઙ્ગાં સ્મરન્કામવશં ગતોઽથ
પપ્રચ્છ કાન્તાં તટસંસ્થિતાં ચ ॥ ૧૫॥

કાસિ પ્રિયે કસ્ય સુતાસિ કસ્મા-
દિહ સ્થિતા ત્વં વિજને વરોરુ ।
એકાકિની કિં વદ ચારુનેત્રે
વિવાહિતા વા ન વિવાહિતાસિ ॥ ૧૬॥

સઞ્જાતકામોઽહમરાલનેત્રે
ત્વાં વીક્ષ્ય કાન્તાં ચ મનોરમાં ચ ।
બ્રૂહિ પ્રિયે યાસિ ચિકીર્ષસિ ત્વં
કિં ચેતિ સર્વં મમ વિસ્તરેણ ॥ ૧૭॥

ઇત્યેવમુક્ત્વા સુદતી નૃપેણ
પ્રોવાચ તં સસ્મિતમમ્બુજેક્ષણા ।
દાશસ્ય પુત્રીં ત્વમવેહિ રાજન્
કન્યાં પિતુઃ શાસનસંસ્થિતાં ચ ॥ ૧૮॥

તરીમિમાં ધર્મનિમિત્તમેવ
સંવાહયામીહ જલે નૃપેન્દ્ર ।
પિતા ગૃહે મેઽદ્ય ગતોઽસ્તિ કામં
સત્યં બ્રવીમ્યર્થપતે તવાગ્રે ॥ ૧૯॥

ઇત્યેવમુક્ત્વા વિરરામ બાલા
કામાતુરસ્તાં નૃપતિર્બભાષે ।
કુરુપ્રવીરં કુરુ માં પતિં ત્વં
વૃથા ન ગચ્છેન્નનુ યૌવનં તે ॥ ૨૦॥

ન ચાસ્તિ પત્ની મમ વૈ દ્વિતીયા
ત્વં ધર્મપત્ની ભવ મે મૃગાક્ષિ ।
દાસોઽસ્મિ તેઽહં વશગઃ સદૈવ
મનોભવસ્તાપયતિ પ્રિયે મામ્ ॥ ૨૧॥

ગતા પ્રિયા માં પરિહૃત્ય કાન્તા
નાન્યા વૃતાહં વિધુરોઽસ્મિ કાન્તે ।
ત્વાં વીક્ષ્ય સર્વાવયવાતિરમ્યાં
મનો હિ જાતં વિવશં મદીયમ્ ॥ ૨૨॥

શ્રુત્વામૃતાસ્વાદરસં નૃપસ્ય
વચોઽતિરમ્યં ખલુ દાશકન્યા ।
ઉવાચ તં સાત્ત્વિકભાવયુક્તા
કૃત્વાતિધૈર્યં નૃપતિં સુગન્ધા ॥ ૨૩॥

યદાત્થ રાજન્ મયિ તત્તથૈવ
મન્યેઽહમેતત્તુ યથા વચસ્તે ।
નાસ્મિ સ્વતન્ત્રા ત્વમવેહિ કામં
દાતા પિતા મેઽર્થય તં ત્વમાશુ ॥ ૨૪॥

ન સ્વૈરિણીહાસ્મ્યપિ દાશપુત્રી
પિતુર્વશેઽહં સતતં ચરામિ ।
સ ચેદ્દદાતિ પ્રથિતઃ પિતા મે
ગૃહાણ પાણિં વશગાસ્મિ તેઽહમ્ ॥ ૨૫॥

મનોભવસ્ત્વાં નૃપ કિં દુનોતિ
યથા પુનર્માં નવયૌવનાં ચ ।

દુનોતિ તત્રાપિ હિ રક્ષણીયા
ધૃતિઃ કુલાચારપરમ્પરાસુ ॥ ૨૬॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યા નૃપતિ કામમોહિતઃ ।
ગતો દાશપતેર્ગેહં તસ્યા યાચનહેતવે ॥ ૨૭॥

દૃષ્ટ્વા નૃપતિમાયાન્તં દાશોઽતિવિસ્મયં ગતઃ ।
પ્રણામં નૃપતેઃ કૃત્વા કૃતાઞ્જલિરભાષત ॥ ૨૮॥

દાશ ઉવાચ ।
દાસોઽસ્મિ તવ ભૂપાલ કૃતાર્થોઽહં તવાગમે ।
આજ્ઞાં દેહિ મહારાજ યદર્થમિહ ચાગમઃ ॥ ૨૯॥

રાજોવાચ ।
ધર્મપત્નીં કરિષ્યામિ સુતામેતાં તવાનઘ ।
ત્વયા ચેદ્દીયતે મહ્યં સત્યમેતદ્બ્રવીમિ તે ॥ ૩૦॥

દાશ ઉવાચ ।
કન્યારત્નં મદીયં ચેદ્યત્ત્વં પ્રાર્થયસે નૃપ ।
દાતવ્યં તુ પ્રદાસ્યામિ ન ત્વદેયં કદાચન ॥ ૩૧॥

તસ્યાઃ પુત્રો મહારાજ ત્વદન્તે પૃથિવીપતિઃ ।
સર્વથા ચાભિષેક્તવ્યો નાન્યઃ પુત્રસ્તવેતિ વૈ ॥ ૩૨॥

સૂત ઉવાચ ।
શ્રુત્વાવાક્યં તુ દાશસ્ય રાજા ચિન્તાતુરોઽભવત્ ।
ગાઙ્ગેયં મનસા કૃત્વા નોવાચ નૃપતિસ્તદા ॥ ૩૩॥

કામાતુરો ગૃહં પ્રાપ્તશ્ચિન્તાવિષ્ટો મહીપતિઃ ।
ન સસ્નૌ બુભુજે નાથ ન સુષ્વાપ ગૃહં ગતઃ ॥ ૩૪॥

ચિન્તાતુરં તુ તં દૃષ્ટ્વા પુત્રો દેવવ્રતસ્તદા ।
ગત્વાપૃચ્છન્મહીપાલં તદસન્તોષકારણમ્ ॥ ૩૫॥

દુર્જયઃ કોઽસ્તિ શત્રુસ્તે કરોમિ વશગં તવ ।
કા ચિન્તા નૃપશાર્દૂલ સત્યં વદ નૃપોત્તમ ॥ ૩૬॥

કિં તેન જાતેન સુતેન રાજન્

દુઃખં ન જાનાતિ ન નાશયેદ્યઃ ।
ઋણં ગ્રહીતું સમુપાગતોઽસૌ
પ્રાગ્જન્મજં નાત્ર વિચારણાસ્તિ ॥ ૩૭॥

વિમુચ્ય રાજ્યં રઘુનન્દનોઽપિ
તાતાજ્ઞયા દાશરથિસ્તુ રામઃ ।
વનં ગતો લક્ષ્મણજાનકીભ્યાં
સહૈવ શૈલં કિલ ચિત્રકૂટમ્ ॥ ૩૮॥

સુતો હરિશ્ચન્દ્રનૃપસ્ય રાજન્
યો રોહિતશ્ચેતિ પ્રસિદ્ધનામા ।
ક્રીતોઽથ પિત્રા વિપણોદ્યતશ્ચ
દાસાર્પિતો વિપ્રગૃહે તુ નૂનમ્ ॥ ૩૯॥

તથાજિગર્તસ્ય સુતો વરિષ્ઠો
નામ્ના શુનઃશેપ ઇતિ પ્રસિદ્ધઃ ।
ક્રીતસ્તુ પિત્રાપ્યથ યૂપબદ્ધઃ
સમ્મોચિતો ગાધિસુતેન પશ્ચાત્ ॥ ૪૦॥

પિત્રાજ્ઞયા જામદગ્ન્યેન પૂર્વં
છિન્નં શિરો માતુરિતિ પ્રસિદ્ધમ્ ।
અકાર્યમપ્યાચરિતં ચ તેન
ગુરોરનુજ્ઞા ચ ગરીયસી કૃતા ॥ ૪૧॥

ઇદં શરીરં તવ ભૂપતે ન
ક્ષમોઽસ્મિ નૂનં વદ કિં કરોમ્યહમ્ ।
ન શોચનીયં મયિ વર્તમાને-
ઽપ્યસાધ્યમર્થં પ્રતિપાદયામ્યદઃ ॥ ૪૨॥

પ્રબ્રૂહિ રાજંસ્તવ કાસ્તિ ચિન્તા
નિવારયામ્યદ્ય ધનુર્ગૃહીત્વા ।
દેહેન મે ચેચ્ચરિતાર્થતા વા
ભવત્વમોઘા ભવતશ્ચિકીર્ષા ॥ ૪૩॥

ધિક્ તં સુતં યઃ પિતુરીપ્સિતાર્થં
ક્ષમોઽપિ સન્ન પ્રતિપાદયેદ્યઃ ।
જાતેન કિં તેન સુતેન કામં

પિતુર્ન ચિન્તાં હિ સમુદ્ધરેધઃ ॥ ૪૪॥

સૂત ઉવાચ ।
નિશમ્યેતિ વચસ્તસ્ય પુત્રસ્ય શન્તનુર્નૃપઃ ।
લજ્જમાનસ્તુ મનસા તમાહ ત્વરિતં સુતમ્ ॥ ૪૫॥

રાજોવાચ ।
ચિન્તા મે મહતી પુત્ર યસ્ત્વમેકોઽસિ મે સુતઃ ।
શૂરોઽતિબલવાન્માની સઙ્ગ્રામેષ્વપરાઙ્મુખઃ ॥ ૪૬॥

એકાપત્યસ્ય મે તાત વૃથેદં જીવિતં કિલ ।
મૃતે ત્વયિ મૃધે ક્વાપિ કિં કરોમિ નિરાશ્રયઃ ॥ ૪૭॥

એષા મે મહતી ચિન્તા તેનાદ્ય દુઃખિતોઽસ્મ્યહમ્ ।
નાન્યા ચિન્તાસ્તિ મે પુત્ર યાં તવાગ્રે વદામ્યહમ્ ॥ ૪૮॥

સૂત ઉવાચ ।
તદાકર્ણ્યાથ ગાઙ્ગેયો મન્ત્રિવૃદ્ધાનપૃચ્છત ।
ન માં વદતિ ભૂપાલો લજ્જયાદ્ય પરિપ્લુતઃ ॥ ૪૯॥

વિત્ત વાર્તાં નૃપસ્યાદ્ય પૃષ્ટ્વા યૂયં વિનિશ્ચયાત્ ।
સત્યં બ્રુવન્તુ માં સર્વં તત્કરોમિ નિરાકુલઃ ॥ ૫૦॥

તચ્છ્રુત્વા તે નૃપં ગત્વા સંવિજ્ઞાય ચ કારણમ્ ।
શશંસુર્વિદિતાર્થસ્તુ ગાઙ્ગેયસ્તદચિન્તયત્ ॥ ૫૧॥

સહિતસ્તૈર્જગામાશુ દાશસ્ય સદનં તદા ।
પ્રેમપૂર્વમુવાચેદં વિનમ્રો જાહ્નવીસુતઃ ॥ ૫૨॥

ગાઙ્ગેય ઉવાચ ।
પિત્રે દેહિ સુતાં તેઽદ્ય પ્રાર્થયામિ સુમધ્યમામ્ ।
માતા મેઽસ્તુ સુતેયં તે દાસોઽસ્મ્યસ્યાઃ પરન્તપ ॥ ૫૩॥

દાશ ઉવાચ ।
ત્વં ગૃહાણ મહાભાગ પત્નીં કુરુ નૃપાત્મજ ।
પુત્રોઽસ્યા ન ભવેદ્રાજા વર્તમાને ત્વયીતિ વૈ ॥ ૫૪॥

ગાઙ્ગેય ઉવાચ ।
માતેયં મમ દાશેયી રાજ્યં નૈવ કરોમ્યહમ્ ।

પુત્રોઽસ્યાઃ સર્વથા રાજ્યં કરિષ્યતિ ન સંશયઃ ॥ ૫૫॥

દાશ ઉવાચ ।
સત્યં વાક્યં મયા જ્ઞાતં પુત્રસ્તે બલવાન્ભવેત્ ।
સોઽપિ રાજ્યં બલાન્નૂનં ગૃહ્ણીયાદિતિ નિશ્ચયઃ ॥ ૫૬॥

ગાઙ્ગેય ઉવાચ ।
ન દારસઙ્ગ્રહં નૂનં કરિષ્યામિ હિ સર્વથા ।
સત્યં મે વચનં તાત મયા ભીષ્મં વ્રતં કૃતમ્ ॥ ૫૭॥

સૂત ઉવાચ ।
એવં કૃતાં પ્રતિજ્ઞાં તુ નિશમ્ય ઝષજીવકઃ ।
દદૌ સત્યવતીં તસ્મૈ રાજ્ઞે સર્વાઙ્ગશોભનામ્ ॥ ૫૮॥

અનેન વિધિના તેન વૃતા સત્યવતી પ્રિયા ।
ન જાનાતિ પરં જન્મ વ્યાસસ્ય નૃપસત્તમઃ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે દેવવ્રતપ્રતિજ્ઞાવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૫॥

## ૨.૬ ષષ્ઠોઽધ્યાયઃ । યુધિષ્ઠિરાદીનામુત્પત્તિવર્ણનમ્ ।

સૂત ઉવાચ ।
એવં સત્યવતી તેન વૃતા શન્તનુના કિલ ।
દ્વૌ પુત્રૌ ચ તયા જાતૌ મૃતૌ કાલવશાદપિ ॥ ૧॥

વ્યાસવીર્યાત્તુ સઞ્જાતો ધૃતરાષ્ટ્રોઽન્ધ એવ ચ ।
મુનિં દૃષ્ટ્વાથ કામિન્યા નેત્રસમ્મીલને કૃતે ॥ ૨॥

શ્વેતરૂપા યતો જાતા દૃષ્ટ્વા વ્યાસં નૃપાત્મજા ।
વ્યાસકોપાત્સમુત્પન્નઃ પાણ્ડુસ્તેન ન સંશયઃ ॥ ૩॥

સન્તોષિતસ્તયા વ્યાસો દાસ્યા કામકલાવિદા ।
વિદુરસ્તુ સમુત્પન્નો ધર્માંશઃ સત્યવાક્ શુચિઃ ॥ ૪॥

રાજ્યે સંસ્થાપિતઃ પાણ્ડુઃ કનીયાનપિ મન્ત્રિભિઃ ।
અન્ધત્વાદ્ધૃતરાષ્ટ્રોઽસૌ નાધિકારે નિયોજિતઃ ॥ ૫॥

ભીષ્મસ્યાનુમતે રાજ્યં પ્રાપ્તઃ પાણ્ડુર્મહાબલઃ ।

વિદુરોઽપ્યથ મેધાવી મન્ત્રકાર્યે નિયોજિતઃ ॥ ૬॥

ધૃતરાષ્ટ્રસ્ય દ્વે ભાર્યે ગાન્ધારી સૌબલી સ્મૃતા ।
દ્વિતીયા ચ તથા વૈશ્યા ગાર્હસ્ત્યેષુ પ્રતિષ્ઠિતા ॥ ૭॥

પાણ્ડોરપિ તથા પત્ન્યૌ દ્વે પ્રોક્તે વેદવાદિભિઃ ।
શૌરસેની તથા કુન્તી માદ્રી ચ મદ્રદેશજા ॥ ૮॥

ગાન્ધારી સુષુવે પુત્રશતં પરમશોભનમ્ ।
વૈશ્યાપ્યેકં સુતં કાન્તં યુયુત્સું સુષુવે પ્રિયમ્ ॥ ૯॥

કુન્તી તુ પ્રથમં કન્યા સૂર્યાત્કર્ણં મનોહરમ્ ।
સુષુવે પિતૃગેહસ્થા પશ્ચાત્પાણ્ડુપરિગ્રહઃ ॥ ૧૦॥

ઋષય ઊચુઃ ।
કિમેતત્સૂત ચિત્રં ત્વં ભાષસે મુનિસત્તમ ।
જનિતશ્ચ સુતઃ પૂર્વં પાણ્ડુના સા વિવાહિતા ॥ ૧૧॥

સૂર્યાત્કર્ણઃ કથં જાતઃ કન્યાયાં વદ વિસ્તરાત્ ।
કન્યા કથં પુનર્જાતા પાણ્ડુના સા વિવાહિતા ॥ ૧૨॥

સૂત ઉવાચ ।
શૂરસેનસુતા કુન્તી બાલભાવે યદા દ્વિજાઃ ।
કુન્તિભોજેન રાજ્ઞા તુ પ્રાર્થિતા કન્યકા શુભા ॥ ૧૩॥

કુન્તિભોજેન સા બાલા પુત્રી તુ પરિકલ્પિતા ।
સેવનાર્થં તુ દીપ્તસ્ય વિહિતા ચારુહાસિની ॥ ૧૪॥

દુર્વાસાસ્તુ મુનિઃ પ્રાપ્તશ્ચાતુર્માસ્યે સ્થિતો દ્વિજઃ ।
પરિચર્યા કૃતા કુન્ત્યા મુનિસ્તોષં જગામ હ ॥ ૧૫॥

દદૌ મન્ત્રં શુભં તસ્યૈ યેનાહૂતઃ સુરઃ સ્વયમ્ ।
સમાયાતિ તથા કામં પૂરયિષ્યતિ વાઞ્છિતમ્ ॥ ૧૬॥

ગતે મુનૌ તતઃ કુન્તી નિશ્ચયાર્થં ગૃહે સ્થિતા ।
ચિન્તયામાસ મનસા કં સુરં સમચિન્તયે ॥ ૧૭॥

ઉદિતશ્ચ તદા ભાનુસ્તયા દૃષ્ટો દિવાકરઃ ।
મન્ત્રોચ્ચારં તયા કૃત્વા ચાહૂતસ્તિગ્મગુસ્તદા ॥ ૧૮॥

મણ્ડલાન્માનુષં રૂપં કૃત્વા સર્વાતિપેશલમ્ ।

અવાતરત્તદાકાશાત્સમીપે તત્ર મન્દિરે ॥ ૧૯॥

દૃષ્ટ્વા દેવં સમાયાન્તં કુન્તી ભાનું સુવિસ્મિતા ।
વેપમાના રજોદોષં પ્રાપ્તા સદ્યસ્તુ ભામિની ॥ ૨૦॥

કૃતાઞ્જલિઃ સ્થિતા સૂર્યં બભાષે ચારુલોચના ।
સુપ્રીતા દર્શનેનાદ્ય ગચ્છ ત્વં નિજમણ્ડલમ્ ॥ ૨૧॥

સૂર્ય ઉવાચ ।
આહૂતોઽસ્મિ કથં કુન્તિ ત્વયા મન્ત્રબલેન વૈ ।
ન માં ભજસિ કસ્માત્ત્વં સમાહૂય પુરોગતમ્ ॥ ૨૨॥

કામાર્તોઽસ્મ્યસિતાપાઙ્ગિ ભજ માં ભાવસંયુતમ્ ।
મન્ત્રેણાધીનતાં પ્રાપ્તં ક્રીડિતું નય મામિતિ ॥ ૨૩॥

કુન્ત્યુવાચ ॥

કન્યાસ્મ્યહં તુ ધર્મજ્ઞ સર્વસાક્ષિન્નમામ્યહમ્ ।
તવાપ્યહં ન દુર્વાચ્યા કુલકન્યાસ્મિ સુવ્રત ॥ ૨૪॥

સૂર્ય ઉવાચ ।
લજ્જા મે મહતી ચાદ્ય યદિ ગચ્છામ્યહં વૃથા ।
વાચ્યતાં સર્વદેવાનાં યાસ્યામ્યત્ર ન સંશયઃ ॥ ૨૫॥

શપ્સ્યામિ તં દ્વિજં ચાદ્ય યેન મન્ત્રઃ સમર્પિતઃ ।
ત્વાં ચાપિ સુભૃશં કુન્તિ નોચેન્માં ત્વં ભજિષ્યસિ ॥ ૨૬॥

કન્યાધર્મઃ સ્થિરસ્તે સ્યાન્ન જ્ઞાસ્યન્તિ જનાઃ કિલ ।
મત્સમસ્તુ તથા પુત્રો ભવિતા તે વરાનને ॥ ૨૭॥

ઇત્યુક્ત્વા તરણિઃ કુન્તીં તન્મનસ્કાં સુલજ્જિતામ્ ।
ભુક્ત્વા જગામ દેવેશો વરં દત્ત્વાતિવાઞ્છિતમ્ ॥ ૨૮॥

ગર્ભં દધાર સુશ્રોણી સુગુપ્તે મન્દિરે સ્થિતા ।
ધાત્રી વેદ પ્રિયા ચૈકા ન માતા ન જનસ્તથા ॥ ૨૯॥

ગુપ્તઃ સદ્મનિ પુત્રસ્તુ જાતશ્ચાતિમનોહરઃ ।
કવચેનાતિરમ્યેણ કુણ્ડલાભ્યાં સમન્વિતઃ ॥ ૩૦॥

દ્વિતીય ઇવ સૂર્યસ્તુ કુમાર ઇવ ચાપરઃ ।
કરે કૃત્વાથ ધાત્રેયી તામુવાચ સુલજ્જિતામ્ ॥ ૩૧॥

કાં ચિન્તાં કરભોરુ ત્વમાધત્સેઽદ્ય સ્થિતાસ્મ્યહમ્ ।
મઞ્જૂષાયાં સુતં કુન્તી મુઞ્ચન્તી વાક્યમબ્રવીત્ ॥ ૩૨॥

કિં કરોમિ સુતાર્તાહં ત્યજે ત્વાં પ્રાણવલ્લભમ્ ।
મન્દભાગ્યા ત્યજામિ ત્વાં સર્વલક્ષણસંયુતમ્ ॥ ૩૩॥

પાતુત્વાં સગુણાગુણા ભગવતી
સર્વેશ્વરી ચામ્બિકા
સ્તન્યં સૈવ દદાતુ વિશ્વજનની
કાત્યાયની કામદા ।
દ્રક્ષ્યેઽહમ્મુખપઙ્કજં સુલલિતં
પ્રાણપ્રિયાર્હં કદા
ત્યક્ત્વા ત્વાં વિજને વને રવિસુતં
દુષ્ટા યથા સ્વૈરિણી ॥ ૩૪॥

પૂર્વસ્મિન્નપિ જન્મનિ ત્રિજગતાં
માતા ન ચારાધિતા
ન ધ્યાતં પદપઙ્કજં સુખકરં
દેવ્યાઃ શિવાયાશ્ચિરમ્ ।
તેનાહં સુત દુર્ભગાસ્મિ સતતં
ત્યક્ત્વા પુનસ્ત્વાં વને
તપ્સ્યામિ પ્રિય પાતકં સ્મૃતવતી
બુદ્ધ્યા કૃતં યત્સ્વયમ્ ॥ ૩૫॥

સૂત ઉવાવ
ઇત્યુક્ત્યા તં સુતં કુન્તી મઞ્જૂષાયાં ધૃતં કિલ ।
ધાત્રીહસ્તે દદૌ ભીતા જનદર્શનતસ્તથા ॥ ૩૬॥

સ્નાત્વા ત્રસ્તા તદા કુન્તી પિતૃવેશ્મન્યુવાસ સા ।
મઞ્જૂષા વહમાના ચ પ્રાપ્તા હ્યધિરથેન વૈ ॥ ૩૭॥

રાધા સૂતસ્ય ભાર્યા વૈ તયાસૌ પ્રાર્થિતઃ સુતઃ ।
કર્ણોઽભૂદ્બલવાન્વીરઃ પાલિતઃ સૂતસદ્મનિ ॥ ૩૮॥

કુન્તી વિવાહિતા કન્યા પાણ્ડુના સા સ્વયમ્વરે ।
માદ્રી ચૈવાપરા ભાર્યા મદ્રરાજસુતા શુભા ॥ ૩૯॥

મૃગયાં રમમાણસ્તુ વને પાણ્ડુર્મહાબલઃ ।
જઘાન મૃગબુદ્ધ્યા તુ રમમાણં મુનિં વને ॥ ૪૦॥

શપ્તસ્તેન તદા પાણ્ડુર્મુનિના કુપિતેન ચ ।
સ્ત્રીસઙ્ગં યદિ કર્તાસિ તદા તે મરણં ધ્રુવમ્ ॥ ૪૧॥

ઇતિ શપ્તસ્તુ મુનિના પાણ્ડુઃ શોકસમન્વિતઃ ।
ત્યક્ત્વા રાજ્યં વને વાસં ચકાર ભૃશદુઃખિતઃ ॥ ૪૨॥

કુન્તી માદ્રી ચ ભાર્યે દ્વે જગ્મતુઃ સહ સઙ્ગતે ।
સેવનાર્થં સતીધર્મં સંશ્રિતે મુનિસત્તમાઃ ॥ ૪૩॥

ગઙ્ગાતીરે સ્થિતઃ પાણ્ડુર્મુનીનામાશ્રમેષુ ચ ।
શ‍ૃણ્વાનો ધર્મશાસ્ત્રાણિ ચકાર દુશ્ચરં તપઃ ॥ ૪૪॥

કથાયાં વર્તમાનાયાં કદાચિદ્ધર્મસંશ્રિતમ્ ।
અશ‍ૃણોદ્વચનં રાજા સુપૃષ્ટં મુનિભાષિતમ્ ॥ ૪૫॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગે ગન્તું પરન્તપ ।
યેન કેનાપ્યુપાયેન પુત્રસ્ય જનનં ચરેત્ ॥ ૪૬॥

અંશજઃ પુત્રિકાપુત્રઃ ક્ષેત્રજો ગોલકસ્તથા ।
કુણ્ડઃ સહોઢઃ કાનીનઃ ક્રીતઃ પ્રાપ્તસ્તથા વને ॥ ૪૭॥

દત્તઃ કેનાપિ ચાશક્તૌ ધનગ્રાહિસુતાઃ સ્મૃતાઃ ।
ઉત્તરોત્તરતઃ પુત્રા નિકૃષ્ટા ઇતિ નિશ્ચયઃ ॥ ૪૮॥

ઇત્યાકર્ણ્ય તદા પ્રાહ કુન્તીં કમલલોચનામ્ ।
સુતમુત્પાદયાશુ ત્વં મુનિં ગત્વા તપોઽન્વિતમ્ ॥ ૪૯॥

મમાજ્ઞયા ન દોષસ્તે પુરા રાજ્ઞા મહાત્મના ।
વસિષ્ઠાજ્જનિતઃ પુત્રઃ સૌદાસેનેતિ મે શ્રુતમ્ ॥ ૫૦॥

તં કુન્તી વચનં પ્રાહ મમ મન્ત્રોઽસ્તિ કામદઃ ।
દત્તો દુર્વાસસા પૂર્વં સિદ્ધિદઃ સર્વથા પ્રભો ॥ ૫૧॥

નિમન્ત્રયેઽહં યં દેવં મન્ત્રેણાનેન પાર્થિવ ।
આગચ્છેત્સર્વથાસૌ વૈ મમ પાર્શ્વં નિમન્ત્રિતઃ ॥ ૫૨॥

ભર્તુર્વાક્યેન સા તત્ર સ્મૃત્વા ધર્મં સુરોત્તમમ્ ।

સઙ્ગમ્ય સુષુવે પુત્રં પ્રથમં ચ યુધિષ્ઠિરમ્ ॥ ૫૩॥

વાયોર્વૃકોદરં પુત્રં જિષ્ણું ચૈવ શતક્રતોઃ ।
વર્ષે વર્ષે ત્રયઃ પુત્રાઃ કુન્ત્યા જાતા મહાબલાઃ ॥ ૫૪॥

માદ્રી પ્રાહ પતિં પાણ્ડું પુત્રં મે કુરુ સત્તમ ।
કિં કરોમિ મહારાજ દુઃખં નાશય મે પ્રભો ॥ ૫૫॥

પ્રાર્થિતા પતિના કુન્તી દદૌ મન્ત્રં દયાન્વિતા ।
એકપુત્રપ્રબન્ધેન માદ્રી પતિમતે સ્થિતા ॥ ૫૬॥

સ્મૃત્વા તદાશ્વિનૌ દેવૌ મદ્રરાજસુતા સુતૌ ।
નકુલઃ સહદેવશ્ચ સુષુવે વરવર્ણિની ॥ ૫૭॥

એવં તે પાણ્ડવાઃ પઞ્ચ ક્ષેત્રોત્પન્તાઃ સુરાત્મજાઃ ।
વર્ષવર્ષાન્તરે જાતા વને તસ્મિન્દ્વિજોત્તમાઃ ॥ ૫૮॥

એકસ્મિન્સમયે પાણ્ડુર્માદ્રીં દૃષ્ટ્વાથ નિર્જને ।
આશ્રમે ચાતિકામાર્તો જગ્રાહાગતવૈશસઃ ॥ ૫૯॥

મા મા મા મેતિ બહુધા નિષિદ્ધોઽપિતયા ભૃશમ્ ।
આલિલિઙ્ગ પ્રિયાં દૈવાત્પપાત ધરણીતલે ॥ ૬૦॥

યથા વૃક્ષગતા વલ્લી છિન્ને પતતિ વૈ દ્રુમે ।
તથા સા પતિતા બાલા કુર્વન્તી રોદનં બહુ ॥ ૬૧॥

પ્રત્યાગતા તદા કુન્તી રુદતી બાલકાસ્તથા ।
મુનયશ્ચ મહાભાગાઃ શ્રુત્વા કોલાહલં તદા ॥ ૬૨॥

મૃતઃ પાણ્ડુસ્તદા સર્વે મુનયઃ સંશિતવ્રતાઃ ।
સહાગ્નિભિર્વિધિં કૃત્વા ગઙ્ગાતીરે તદાદહન્ ॥ ૬૩॥

ચક્રે સહૈવ ગમનં માદ્રી દત્ત્વા સુતૌ શિશૂ ।
કુન્ત્યૈ ધર્મં પુરસ્કૃત્ય સતીનાં સત્યકામતઃ ॥ ૬૪॥

જલદાનાદિકં કૃત્વા મુનયસ્તત્ર વાસિનઃ ।
પઞ્ચપુત્રયુતાં કુન્તીમનયન્હસ્તિનાપુરમ્ ॥ ૬૫॥

તાં પ્રાપ્તાં ચ સમાજ્ઞાય ગાઙ્ગેયો વિદુરસ્તથા ।
નગરીં ધૃતરાષ્ટ્રસ્ય સર્વે તત્ર સમાયયુઃ ॥ ૬૬॥

પપ્રચ્છુશ્ચ જનાઃ સર્વે કસ્ય પુત્રા વરાનને ।
પાણ્ડોઃ શાપં સમાજ્ઞાય કુન્તી દુઃખાન્વિતા તદા ॥ ૬૭॥

તાનુવાચ સુરાણાં વૈ પુત્રાઃ કુરુકુલોદ્ભવાઃ ।
વિશ્વાસાર્થં સમાહૂતાઃ કુન્ત્યા સર્વે સુરાસ્તદા ॥ ૬૮॥

આગત્ય ખે તદા તૈસ્તુ કથિતં નઃ સુતાઃ કિલ ।
ભીષ્મેણ સત્કૃતં વાક્યં દેવાનાં સત્કૃતાઃ સુતાઃ ॥ ૬૯॥

ગતા નાગપુરં સર્વે તાનાદાય સુતાન્વધૂમ્ ।
ભીષ્માદયઃ પ્રીતચિત્તાઃ પાલયામાસુરર્થતઃ ॥ ૭૦॥

એવં પાર્થાઃ સમુત્પન્ના ગાઙ્ગેયેનાથ પાલિતાઃ ॥ ૭૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે યુધિષ્ઠિરાદીનામુત્પત્તિવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૬॥

## ૨.૭ સપ્તમોઽધ્યાયઃ । પાણ્ડવાનાં કથાનકં મૃતાનાં દર્શનવર્ણનમ્ ।

સૂત ઉવાચ ।
પઞ્ચાનાં દ્રૌપદી ભાર્યા સા માન્યા સા પતિવ્રતા ।
પઞ્ચ પુત્રાસ્તુ તસ્યાઃ સ્યુર્ભર્તૃભ્યોઽતીવ સુન્દરાઃ ॥ ૧॥

અર્જુનસ્ય તથા ભાર્યા કૃષ્ણસ્ય ભગિની શુભા ।
સુભદ્રા યા હૃતા પૂર્વં જિષ્ણુના હરિસમ્મતે ॥ ૨॥

તસ્યાં જાતો મહાવીરો નિહતોઽસૌ રણાજિરે ।
અભિમન્યુર્હતાસ્તત્ર દ્રૌપદ્યાશ્ચ સુતાઃ કિલ ॥ ૩॥

અભિમન્યોર્વરા ભાર્યા વૈરાટી ચાતિસુન્દરી ।
કુલાન્તે સુષુવે પુત્રં મૃતો બાણાગ્નિના શિશુઃ ॥ ૪॥

જીવિતઃ સ તુ કૃષ્ણેન ભાગિનેયસુતઃ સ્વયમ્ ।
દ્રૌણિબાણાગ્નિનિર્દગ્ધઃ પ્રતાપેનાદ્ભુતેન ચ ॥ ૫॥

પરિક્ષીણેષુ વંશેષુ જાતો યસ્માદ્વરઃ સુતઃ ।
તસ્માત્પરીક્ષિતો નામ વિખ્યાતઃ પૃથિવીતલે ॥ ૬॥

નિહતેષુ ચ પુત્રેષુ ધૃતરાષ્ટ્રોઽતિદુઃખિતઃ ।
તસ્થૌ પાણ્ડવરાજ્યે ચ ભીમવાગ્બાણપીડિતઃ ॥ ૭॥

ગાન્ધારી ચ તથાતિષ્ઠત્ પુત્રશોકાતુરા ભૃશમ્ ।
સેવાં તયોર્દિવારાત્રં ચકારાર્તો યુધિષ્ઠિરઃ ॥ ૮॥

વિદુરોઽપ્યતિધર્માત્મા પ્રજ્ઞાનેત્રમબોધયત્ ।
યુધિષ્ઠિરસ્યાનુમતે ભ્રાતૃપાર્શ્વે વ્યતિષ્ઠત ॥ ૯॥

ધર્મપુત્રોઽપિ ધર્માત્મા ચકાર સેવનં પિતુઃ ।
પુત્રશોકોદ્ભવં દુઃખં તસ્ય વિસ્મારયન્નિવ ॥ ૧૦॥

યથા શ ृણોતિ વૃદ્ધોઽસૌ તથા ભીમોઽતિરોષિતઃ ।
વારબાણેનાહનત્તં તુ શ્રાવયન્સંસ્થિતાઞ્જનાન્ ॥ ૧૧॥

મયા પુત્રા હતાઃ સર્વે દુષ્ટસ્યાન્ધસ્ય તે રણે ।
દુઃશાસનસ્ય રુધિરં પીતં હૃદ્યં તથા ભૃશમ્ ॥ ૧૨॥

ભુનક્તિ પિણ્ડમન્ધોઽયં મયા દત્તં ગતત્રપઃ ।
ધ્વાઙ્ક્ષવદ્વા શ્વવચ્ચાપિ વૃથા જીવત્યસૌ જનઃ ॥ ૧૩॥

એવંવિધાનિ રૂક્ષાણિ શ્રાવયત્યનુવાસરમ્ ।
આશ્વાસયતિ ધર્માત્મા મૂર્ખોઽયમિતિ ચ બ્રુવન્ ॥ ૧૪॥

અષ્ટાદશૈવ વર્ષાણિ સ્થિત્વા તત્રૈવ દુઃખિતઃ ।
ધૃતરાષ્ટ્રો વને યાનં પ્રાર્થયામાસ ધર્મજમ્ ॥ ૧૫॥

અયાચત ધર્મપુત્રં ધૃતરાષ્ટ્રો મહીપતિઃ ।
પુત્રેભ્યોઽહં દદામ્યદ્ય નિર્વાપં વિધિપૂર્વકમ્ ॥ ૧૬॥

વૃકોદરેણ સર્વેષાં કૃતમત્રૌર્ધ્વદૈહિકમ્ ।
ન કૃતં મમ પુત્રાણાં પૂર્વવૈરમનુસ્મરન્ ॥ ૧૭॥

દદાસિ ચેદ્ધનં મહ્યં કૃત્વા ચૈવોર્ધ્વદૈહિકમ્ ।
ગમિષ્યેઽહં વનં તમું તપઃ સ્વર્ગફલપ્રદમ્ ॥ ૧૮॥

એકાન્તે વિદુરેણોક્તો રાજા ધર્મસુતઃ શુચિઃ ।
ધનં દાતું મનશ્ચક્રે ધૃતરાષ્ટ્રાય ચાર્થિને ॥ ૧૯॥

સમાહૂય નિજાન્મર્વાનુવાચ પૃથિવીપતિઃ ।
ધનં દાસ્યે મહાભાગાઃ પિત્રે નિર્વાપકામિને ॥ ૨૦॥

તચ્છ્રુત્વા વચનં ભ્રાતુર્જ્યેષ્ઠસ્યામિતતેજસઃ ।

સઙ્ગ્રહેઽસ્ય મહાબાહુર્મારુતિઃ કુપિતોઽબ્રવીત્ ॥ ૨૧॥

ધનં દેયં મહાભાગ દુર્યોધનહિતાય કિમ્ ।
અન્ધોઽપિ સુખમાપ્નોતિ મૂર્ખત્વં કિમતઃ પરમ્ ॥ ૨૨॥

તવ દુર્મન્ત્રિતેનાથ દુઃખં પ્રાપ્તા વને વયમ્ ।
દ્રૌપદી ચ મહાભાગા સમાનીતા દુરાત્મના ॥ ૨૩॥

વિરાટભવને વાસઃ પ્રસાદાત્તવ સુવ્રત ।
દાસત્વં ચ કૃતં સર્વૈર્મત્સ્યસ્યામિતવિક્રમૈઃ ॥ ૨૪॥

દેવિતા ત્વં ન ચેજ્જ્યેષ્ઠઃ પ્રભવેત્સઙ્ક્ષયઃ કથમ્ ।
સૂપકારો વિરાટસ્ય હત્વાભૂવં તુ માગધમ્ ॥ ૨૫॥

બૃહન્નલા કથં જિષ્ણુર્ભવેદ્બાલસ્ય નર્તકઃ ।
કૃત્વા વેષં મહાબાહુર્યોષાયા વાસવાત્મજઃ ॥ ૨૬॥

ગાણ્ડીવશોભિતૌ હસ્તૌ કૃતૌ કઙ્કણશોભિતૌ ।
માનુષં ચ વપુઃ પ્રાપ્ય કિં દુઃખં સ્યાદતઃ પરમ્ ॥ ૨૭॥

દૃષ્ટ્વા વેણીં કૃતાં મૂર્ધ્નિ કજ્જલં લોચને તથા ।
અસિં ગૃહીત્વા તરસા છેદ્મ્યહં નાન્યથા સુખમ્ ॥ ૨૮॥

અપૃષ્ટ્વા ચ મહીપાલં નિક્ષિપ્તોઽગ્નિર્મયા ગૃહે ।
દગ્ધુકામશ્ચ પાપાત્મા નિર્દગ્ધોઽસૌ પુરોચનઃ ॥ ૨૯॥

કીચકા નિહતાઃ સર્વે ત્વામપૃષ્ટ્વા જનાધિપ ।
ન તથા નિહતાઃ સર્વે સભાર્યા ધૃતરાષ્ટ્રજાઃ ॥ ૩૦॥

મૂર્ખત્વં તવ રાજેન્દ્ર ગન્ધર્વેભ્યશ્ચ મોચિતાઃ ।
દુર્યોધનાદયઃ કામં શત્રવો નિગડીકૃતાઃ ॥ ૩૧॥

દુર્યોધનહિતાયાદ્ય ધનં દાતું ત્વમિચ્છસિ ।
નાહં દદે મહીપાલ સર્વથા પ્રેરિતસ્ત્વયા ॥ ૩૨॥

ઇત્યુક્ત્વા નિર્ગતે ભીમે ત્રિભિઃ પરિવૃતો નૃપઃ ।
દદૌ વિત્તં સુબહુલં ધૃતરાષ્ટ્રાય ધર્મજઃ ॥ ૩૩॥

કારયામાસ વિધિવત્પુત્રાણાં ચૌર્ધ્વદૈહિકમ્ ।
દદૌ દાનાનિ વિપ્રેભ્યો ધૃતરાષ્ટ્રોઽમ્બિકાસુતઃ ॥ ૩૪॥

કૃત્વૌર્ધ્વદૈહિકં સર્વં ગાન્ધારીસહિતો નૃપઃ ।
પ્રવિવેશ વનં તૂર્ણં કુન્ત્યા ચ વિદુરેણ ચ ॥ ૩૫॥

સઞ્જયેન પરિજ્ઞાતો નિર્ગતોઽસૌ મહામતિઃ ।
પુત્રૈર્નિવાર્યમાણાપિ શૂરસેનસુતા ગતા ॥ ૩૬॥

વિલપન્ભીમસેનોઽપિ તથાન્યે ચાપિ કૌરવાઃ ।
ગઙ્ગાતીરાત્પરાવૃત્ય યયુઃ સર્વે ગજાહ્વયમ્ ॥ ૩૭॥

તે ગત્વા જાહ્નવીતીરે શતયૂપાશ્રમં શુભમ્ ।
કૃત્વા તૃણૈઃ કુટીં તત્ર તપસ્તેપુઃ સમાહિતાઃ ॥ ૩૮॥

ગતાન્યબ્દાનિ ષટ્ તેષાં યદા યાતા હિ તાપસાઃ ।
યુધિષ્ઠિરસ્તુ વિરહાદનુજાનિદમબ્રવીત્ ॥ ૩૯॥

સ્વપ્ને દૃષ્ટા મયા કુન્તી દુર્બલા વનસંસ્થિતા ।
મનો મે જાયતે દ્રષ્ટું માતરં પિતરૌ તથા ॥ ૪૦॥

વિદુરં ચ મહાત્માનં સઞ્જયં ચ મહામતિમ્ ।
રોચતે યદિ વઃ સર્વાન્ વ્રજામ ઇતિ મે મતિઃ ॥ ૪૧॥

તતસ્તે ભ્રાતરઃ સર્વે સુભદ્રા દ્રૌપદી તથા ।
વૈરાટી ચ મહાભાગા તથા નાગરિકો જનઃ ॥ ૪૨॥

પ્રાપ્તાઃ સર્વજનૈઃ સાર્ધં પાણ્ડવા દર્શનોત્સુકાઃ ।
શતયૂપાશ્રમં પ્રાપ્ય દદૃશુઃ સર્વ એવ તે ॥ ૪૩॥

વિદુરો ન યદા દૃષ્ટો ધર્મસ્તં પૃષ્ટવાંસ્તદા ।
ક્વાસ્તે સ વિદુરો ધીમાંસ્તમુવાચામ્બિકાસુતઃ ॥ ૪૪॥

વિરક્તશ્ચરતે ક્ષત્તા નિરીહો નિષ્પરિગ્રહઃ ।
કુતોઽપ્યેકાન્તસંવાસી ધ્યાયતેઽન્તઃ સનાતનમ્ ॥ ૪૫॥

ગઙ્ગાં ગચ્છન્દ્વિતીયેઽહ્નિ વને રાજા યુધિષ્ઠિરઃ ।
દદર્શ વિદુરં ક્ષામં તપસા સંશિતવ્રતમ્ ॥ ૪૬॥

દૃષ્ટ્વોવાચ મહીપાલો વન્દેઽહં ત્વાં યુધિષ્ઠિરઃ ।
તસ્થૌ શ્રુત્વા ચ વિદુરઃ સ્થાણુભૂત ઇવાનઘઃ ॥ ૪૭॥

ક્ષણેન વિદુરસ્યાસ્યાન્નિઃસૃતં તેજ અદ્ભુતમ્ ।
લીનં યુધિષ્ઠિરસ્યાસ્યે ધર્માંશત્વાત્પરસ્પરમ્ ॥ ૪૮॥

ક્ષત્તા જહૌ તદા પ્રાણાઞ્છુશોચાતિ યુધિષ્ઠિરઃ ।
દાહાર્થં તસ્ય દેહસ્ય કૃતવાનુદ્યમં નૃપઃ ॥ ૪૯॥

શ‍ૃણ્વતસ્તુ તદા રાજ્ઞો વાગુવાચાશરીરિણી ।
વિરક્તોઽયં ન દાહાર્હો યથેષ્ટં ગચ્છ ભૂપતે ॥ ૫૦॥

શ્રુત્વા તે ભ્રાતરઃ સર્વે સસ્નુર્ગઙ્ગાજલેઽમલે ।
ગત્વા નિવેદયામાસુર્ધૃતરાષ્ટ્રાય વિસ્તરાત્ ॥ ૫૧॥

સ્થિતાસ્તત્રાશ્રમે સર્વે પાણ્ડવા નાગરૈઃ સહ ।
તત્ર સત્યવતીસૂનુર્નારદશ્ચ સમાગતઃ ॥ ૫૨॥

મુનયોઽન્યે મહાત્માનશ્ચાગતા ધર્મનન્દનમ્ ।
કુન્તી પ્રાહ તદા વ્યાસં સંસ્થિતં શુભદર્શનમ્ ॥ ૫૩॥

કૃષ્ણ કર્ણસ્તુ પુત્રો મે જાતમાત્રસ્તુ વીક્ષિતઃ ।
મનો મે તપ્યતેઽત્યર્થં દર્શયસ્વ તપોધન ॥ ૫૪॥

સમર્થોઽસિ મહાભાગ કુરુ મે વાઞ્છિતં પ્રભો ।
ગાન્ધાર્યુવાચ ।
દુર્યોધનો રણેઽગચ્છદ્વીક્ષિતો ન મયા મુને ॥ ૫૫॥

તં દર્શય મુનિશ્રેષ્ઠ પુત્રં મે ત્વં સહાનુજમ્ ।
સુભદ્રોવાચ ।
અભિમન્યું મહાવીરં પ્રાણાદપ્યધિકં પ્રિયમ્ ॥ ૫૬॥

દ્રષ્ટુકામાસ્મિ સર્વજ્ઞ દર્શયાદ્ય તપોધન ।
સૂત ઉવાચ ।
એવંવિધાનિ વાક્યાનિ શ્રુત્વા સત્યવતીસુતઃ ॥ ૫૭॥

પ્રાણાયામં તતઃ કૃત્વા દધ્યૌ દેવીં સનાતનીમ્ ।
સન્ધ્યાકાલેઽથ સમ્પ્રાપ્તે ગઙ્ગાયાં મુનિસત્તમઃ ॥ ૫૮॥

સર્વાંસ્તાંશ્ચ સમાહૂય યુધિષ્ઠિરપુરોગમાન્ ।
તુષ્ટાવ વિશ્વજનનીં સ્નાત્વા પુણ્યસરિજ્જલે ॥ ૫૯॥

પ્રકૃતિં પુરુષારામાં સગુણાં નિર્ગુણાં તથા ।
દેવદેવીં બ્રહ્મરૂપાં મણિદ્વીપાધિવાસિનીમ્ ॥ ૬૦॥

યદા ન વેધા ન ચ વિષ્ણુરીશ્વરો
ન વાસવો નૈવ જલાધિપસ્તથા ।
ન વિત્તપો નૈવ યમશ્ચ પાવક-
સ્તદાસિ દેવિ ત્વમહં નમામિ તામ્ ॥ ૬૧॥

જલં ન વાયુર્ન ધરા ન ચામ્બરં
ગુણા ન તેષાં ચ ન ચેન્દ્રિયાણ્યહમ્ ।
મનો ન બુદ્ધિર્ન ચ તિગ્મગુઃ શશી
તદાસિ દેવિ ત્વમહં નમામિ તામ્ ॥ ૬૨॥

ઇમં જીવલોકં સમાધાય ચિત્તે
ગુણૈર્લિઙ્ગકોશં ચ નીત્વા સમાધૌ ।
સ્થિતા કલ્પકાલં નયસ્યાત્મતન્ત્રા
ન કોઽપ્યસ્તિ વેત્તા વિવેકં ગતોઽપિ ॥ ૬૩॥

પ્રાર્થયત્યેષ માં લોકો મૃતાનાં દર્શનં પુનઃ ।
નાહં ક્ષમોઽસ્મિ માતસ્ત્વં દર્શયાશુ જનાન્મૃતાન્ ॥ ૬૪॥

સૂત ઉવાચ ।
એવં સ્તુતા તદા દેવી માયા શ્રીભુવનેશ્વરી ।
સ્વર્ગાદાહૂય સર્વાન્વૈ દર્શયામાસ પાર્થિવાન્ ॥ ૬૫॥

દૃષ્ટ્વા કુન્તી ચ ગાન્ધારી સુભદ્રા ચ વિરાટજા ।
પાણ્ડવા મુમુદુઃ સર્વે વીક્ષ્ય પ્રત્યાગતાન્સ્વકાન્ ॥ ૬૬॥

પુનર્વિસર્જિતાસ્તેન વ્યાસેનામિતતેજસા ।
સ્મૃત્વા દેવીં મહામાયામિન્દ્રજાલમિવોદ્યતમ્ ॥ ૬૭॥

તદા પૃષ્ટ્વા યયુઃ સર્વે પાણ્ડવા મુનયસ્તથા ।
રાજા નાગપુરં પ્રાપ્તઃ કુર્વન્ વ્યાસકથાં પથિ ॥ ૬૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં દ્વિતીયસ્કન્ધે
પાણ્ડવાનાં કથાનકં મૃતાનાં દર્શનવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૭॥

## ૨.૮ અષ્ટમોઽધ્યાયઃ । રુરુચરિત્રવર્ણનમ્ ।

સૂત ઉવાચ ।

તતો દિને તૃતીયે ચ ધૃતરાષ્ટ્રઃ સ ભૂપતિઃ ।
દાવાગ્નિના વને દગ્ધઃ સભાર્યઃ કુન્તિસંયુતઃ ॥ ૧॥

સઞ્જયસ્તીર્થયાત્રાયાં ગતસ્ત્યક્ત્વા મહીપતિમ્ ।
શ્રુત્વા યુધિષ્ઠિરો રાજા નારદાદ્દુઃખમાપ્તવાન્ ॥ ૨॥

ષટ્ત્રિંશેઽથ ગતે વર્ષે કૌરવાણાં ક્ષયાત્પુનઃ ।
પ્રભાસે યાદવાઃ સર્વે વિપ્રશાપાત્ક્ષયં ગતાઃ ॥ ૩॥

તે પીત્વા મદિરાં મત્તાઃ કૃત્વા યુદ્ધં પરસ્પરમ્ ।
ક્ષયં પ્રાપ્તા મહાત્માનઃ પશ્યતો રામકૃષ્ણયોઃ ॥ ૪॥

દેહં તત્યાજ રામસ્તુ કૃષ્ણઃ કમલલોચનઃ ।
વ્યાધબાણહતઃ શાપં પાલયન્ભગવાન્હરિઃ ॥ ૫॥

વસુદેવસ્તુ તચ્છ્રુત્વા દેહત્યાગં હરેરથ ।
જહૌ પ્રાણાઞ્છુચીન્કૃત્વા ચિત્તે શ્રીભુવનેશ્વરીમ્ ॥ ૬॥

અર્જુનસ્તુ તતો ગત્વા પ્રભાસે ચાતિદુઃખિતઃ ।
સંસ્કારં તત્ર સર્વેષાં યથાયોગ્યં ચકાર હ ॥ ૭॥

સમીક્ષ્યાથ હરેર્દેહં કૃત્વા કાષ્ઠસ્ય સઞ્ચયમ્ ।
અષ્ટાભિઃ સહ પત્નીભિર્દાહયામાસ પાર્થિવઃ ॥ ૮॥

દેહં રામસ્ય રેવત્યા સહ દગ્ધ્વા વિભાવસૌ ।
અર્જુનો દ્વારકામેત્ય પુરાન્નિષ્કામયજ્જનમ્ ॥ ૯॥

પુરી સા વાસુદેવસ્ય પ્લાવિતોદધિના તતઃ ।
અર્જુનઃ સર્વલોકાન્વૈ ગૃહીત્વા નિર્ગતસ્તદા ॥ ૧૦॥

કૃષ્ણપત્ન્યસ્તદા માર્ગે ચૌરાભીરૈશ્ચ લુણ્ઠિતા ।
ધનં સર્વં ગૃહીતં ચ નિસ્તેજશ્ચાર્જુનોઽભવત્ ॥ ૧૧॥

ઇન્દ્રપ્રસ્થે સમાગત્ય વજ્રો રાજા કૃતસ્તદા ।
અનિરુદ્ધસુતો નામ્ના પાર્થેનામિતતેજસા ॥ ૧૨॥

વ્યાસાય કથિતં દુઃખં તેનોક્તોઽસૌ મહારથઃ ।
પુનર્યદા હરિસ્ત્વઞ્ચ ભવિતાસિ મહામતે ॥ ૧૩॥

તદા તેજસ્તવાત્યુગ્રં ભવિષ્યતિ પુનર્યુગે ।
તચ્છ્રુત્વા વચનં પાર્થો ગત્વા નાગપુરેઽર્જુનઃ ॥ ૧૪॥

દુઃખિતો ધર્મરાજાનં વૃત્તાન્તં સર્વમબ્રવીત્ ।
દેહત્યાગં હરેઃ શ્રુત્વા યાદવાનાં ક્ષયં તથા ॥ ૧૫॥

ગમનાય મતિં ચક્રે રાજા હૈમાચલં પ્રતિ ।
ષટ્ત્રિંશદ્વાર્ષિકં રાજ્યે સ્થાપયિત્વોત્તરાસુતમ્ ॥ ૧૬॥

નિર્જગામ વનં રાજા દ્રૌપદ્યા ભ્રાતૃભિઃ સહ ।
ષટ્ત્રિંશચ્ચૈવ વર્ષાણિ કૃત્વા રાજ્યં ગજાહ્વયે ॥ ૧૭॥

ગત્વા હિમાચલે ષટ્ તે જહુઃ પ્રાણાન્પૃથાસુતાઃ ।
પરીક્ષિદપિ રાજર્ષિઃ પ્રજાઃ સર્વાઃ સુધાર્મિકઃ ॥ ૧૮॥

અપાલયચ્ચ રાજેન્દ્રઃ ષષ્ટિવર્ષાણ્યતન્દ્રિતઃ ।
બભૂવ મૃગયાશીલો જગામ ચ વનં મહત્ ॥ ૧૯॥

વિદ્ધં મૃગં વિચિન્વાનો મધ્યાહ્ને ભૂપતિઃ સ્વયમ્ ।
તૃષિતશ્ચ પરિશ્રાન્તઃ ક્ષુધિતશ્ચોત્તરાસુતઃ ॥ ૨૦॥

રાજા ઘર્મેણ સન્તપ્તો દદર્શ મુનિમન્તિકે ।
ધ્યાને સ્થિતં મુનિં રાજા જલં પપ્રચ્છ ચાતુરઃ ॥ ૨૧॥

નોવાચ કિઞ્ચિન્મૌનસ્થશ્ચુકોપ નૃપતિસ્તદા ।
મૃતં સર્પં તદાદાય ધનુષ્કોટ્યા તૃષાતુરઃ ॥ ૨૨॥

કલિનાવિષ્ટચિત્તસ્તુ કણ્ઠે તસ્ય ન્યવેશયત્ ।
આરોપિતે તથા સર્પે નોવાચ મુનિસત્તમઃ ॥ ૨૩॥

ન ચચાલ સમાધિસ્થો રાજાપિ સ્વગૃહં ગતઃ ।
તસ્ય પુત્રોઽતિતેજસ્વી ગવિજાતો મહાતપાઃ ॥ ૨૪॥

મહાશક્તોઽથ શુશ્રાવ ક્રીડમાનો વનાન્તિકે ।
મિત્રાણ્યાહુશ્ચ તત્પુત્રં પિતુઃ કણ્ઠે તવાધુના ॥ ૨૫॥

લમ્ભિતોઽસ્તિ મૃતઃ સર્પઃ કેનાપીતિ મુનીશ્વર ।
તેષાં તદ્વચનં શ્રુત્વા ચુકોપાતિશયં તદા ॥ ૨૬॥

શશાપ નૃપતિં ક્રુદ્ધો ગૃહીત્વાશુ કરે જલમ્ ।
પિતુઃ કણ્ઠેઽદ્ય મે યેન વિનિક્ષિપ્તો મૃતોરગઃ ॥ ૨૭॥

તક્ષકઃ સપ્તરાત્રેણ તં દશેત્પાપપૂરુષમ્ ।

મુનેઃ શિષ્યોઽથ રાજાનં સમુપેત્ય ગૃહે સ્થિતમ્ ॥ ૨૮॥

શાપં નિવેદયામાસ મુનિપુત્રેણ ચાર્પિતમ્ ।
અભિમન્યુસુતઃ શ્રુત્વા શાપં દત્તં દ્વિજેન વૈ ॥ ૨૯॥

અનિવાર્યં ચ વિજ્ઞાય મન્ત્રિવૃદ્ધાનુવાચ હ ।
શપ્તોઽહં દ્વિજરૂપેણ મમ દ્વેષાદસંશયમ્ ॥ ૩૦॥

કિં વિધેયં મયામાત્યા ઉપાયશ્ચિન્ત્યતામિહ ।
મૃત્યુઃ કિલાનિવાર્યોઽસૌ વદન્તિ વેદવાદિનઃ ॥ ૩૧॥

યત્નસ્તથાપિ શાસ્ત્રોક્તઃ કર્તવ્યઃ સર્વથા બુધૈઃ ।
ઉપાયવાદિનઃ કેચિત્પ્રવદન્તિ મનીષિણઃ ॥ ૩૨॥

વિજ્ઞોપાયેન સિધ્યન્તિ કાર્યાણિ નેતરસ્ય ચ ।
મણિમન્ત્રૌષધીનાં વૈ પ્રભાવાઃ ખલુ દુર્વિદઃ ॥ ૩૩॥

ન ભવેદિતિ કિં તૈસ્તુ મણિમદ્ભિઃ સુસાધિતૈઃ ।
સર્પદષ્ટા પુરા ભાર્યા મુનેઃ સઞ્જીવિતા મૃતા ॥ ૩૪॥

દત્ત્વાર્ધમાયુષસ્તેન મુનિના સા વરાપ્સરાઃ ।
ભવિતવ્યે ન વિશ્વાસઃ કર્તવ્યઃ સર્વથા બુધૈઃ ॥ ૩૫॥

પ્રત્યક્ષં તત્ર દૃષ્ટાન્તં પશ્યન્તુ સચિવાઃ કિલ ।
દિવિ કોઽપિ પૃથિવ્યાં વા દૃશ્યતે પુરુષઃ ક્વચિત્ ॥ ૩૬॥

દૈવે મતિં સમાધાય યસ્તિષ્ઠેત્તુ નિરુદ્યમઃ ।
વિરક્તસ્તુ યતિર્ભૂત્વા ભિક્ષાર્થં યાતિ સર્વથા ॥ ૩૭॥

ગૃહસ્થાનાં ગૃહે કામમાહૂતો વાથવાન્યથા ।
યદૃચ્છયોપપન્નં ચ ક્ષિપ્તં કેનાપિ વા મુખે ॥ ૩૮॥

ઉદ્યમેન વિના ચાસ્યાદુદરે સંવિશેત્કથમ્ ।
પ્રયત્નશ્ચોદ્યમે કાર્યો યદા સિદ્ધિં ન યાતિ ચેત્ ॥ ૩૯॥

તદા દૈવં સ્થિતં ચેતિ ચિત્તમાલમ્બયેદ્બુધઃ ।
મન્ત્રિણ ઊચુઃ ।
કો મુનિર્યેન દત્ત્વાર્ધમાયુષો જીવિતા પ્રિયા ॥ ૪૦॥

કથં મૃતા મહારાજ તન્નો બ્રૂહિ સવિસ્તરમ્ ।
રાજોવાચ ।

ભૃગોર્ભાર્યા વરારોહા પુલોમા નામ સુન્દરી ॥ ૪૧॥

તસ્યાં તુ ચ્યવનો નામ મુનિર્જાતોઽતિવિશ્રુતઃ ।
ચ્યવનસ્ય ચ શર્યાતેઃ સુકન્યા નામ સુન્દરી ॥ ૪૨॥

તસ્યાં જજ્ઞે સુતઃ શ્રીમાન્પ્રમતિર્નામ વિશ્રુતઃ ।
પ્રમતેસ્તુ પ્રિયા ભાર્યા પ્રતાપી નામ વિશ્રુતા ॥ ૪૩॥

રુરુર્નામ સુતો જાતસ્તથા પરમતાપસઃ ।
તસ્મિંશ્ચ સમયે કશ્ચિત્સ્થૂલકેશશ્ચ વિશ્રુતઃ ॥ ૪૪॥

બભૂવ તપસા યુક્તો ધર્માત્મા સત્યસમ્મતઃ ।
એતસ્મિન્નન્તરે માન્યા મેનકા ચ વરાપ્સરાઃ ॥ ૪૫॥

ક્રીડાં ચક્રે નદીતીરે ત્રિષુ લોકેષુ સુન્દરી ।
ગર્ભં વિશ્વાવસોઃ પ્રાપ્ય નિર્ગતા વરવર્ણિની ॥ ૪૬॥

સ્થલકેશાશ્રમે ગત્વા વિસસર્જ વરાપ્સરાઃ ।
કન્યકાં ચ નદીતીરે ત્રિષુ લોકેષુ સુન્દરીમ્ ॥ ૪૭॥

દૃષ્ટ્વાનાથાં તદા કન્યાં જગ્રાહ મુનિસત્તમઃ ।
પુપોષ સ્થૂલકેશસ્તુ નામ્ના ચક્રે પ્રમદ્વરામ્ ॥ ૪૮॥

સા કાલે યૌવનં પ્રાપ્તા સર્વલક્ષણસંયુતા ।
રુરુર્દૃષ્ટ્વાથ તાં બાલાં કામબાણાર્દિતો હ્યભૂત્ ॥ ૪૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે રુરુચરિત્રવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૮॥

## ૨.૯ નવમોઽધ્યાયઃ । પરીક્ષિદ્રાજ્ઞો ગુપ્તગૃહે વાસવર્ણનમ્ ।

પરીક્ષિદુવાચ ।
કામાર્તઃ સ મુનિર્ગત્વા રુરુઃ સુપ્તો નિજાશ્રમે ।
પિતા પપ્રચ્છ દીનં તં કિં રુરો વિમના અસિ ॥ ૧॥

સ તમાહાતિકામાર્તઃ સ્થૂલકેશસ્ય ચાશ્રમે ।
કન્યા પ્રમદ્વરા નામ સા મે ભાર્યા ભવેદિતિ ॥ ૨॥

સ ગત્વા પ્રમતિસ્તૂર્ણં સ્થૂલકેશં મહામુનિમ્ ।
પ્રમુહ્ય સુમુખં કૃત્વા યયાચે તાં વરાનનામ્ ॥ ૩॥

દદૌ વાચં સ્થૂલકેશઃ પ્રદાસ્યામિ શુભેઽહનિ ।
વિવાહાર્થં ચ સમ્ભારં રચયામાસતુર્વને ॥ ૪॥

પ્રમતિઃ સ્થૂલકેશશ્ચ વિવાહાર્થં સમુદ્યતૌ ।
બભૂવતુર્મહાત્માનૌ સમીપસ્થૌ તપોવને ॥ ૫॥

તસ્મિન્નવસરે કન્યા રમમાણા ગૃહાઙ્ગણે ।
પ્રસુપ્તં પન્નગં પાદેનાસ્પૃશચ્ચારુલોચના ॥ ૬॥

દષ્ટા તુ પન્નગેનાથ સા મમાર વરાઙ્ગના ।
કોલાહલસ્તદા જાતો મૃતાં દૃષ્ટ્વા પ્રમદ્વરામ્ ॥ ૭॥

મિલિતા મુનયઃ સર્વે ચુક્રુશુઃ શોકસંયુતાઃ ।
ભૂમૌ તાં પતિતાં દૃષ્ટ્વા પિતા તસ્યાતિદુઃખિતઃ ॥ ૮॥

રુરોદ વિગતપ્રાણાં દીપ્યમાનાં સુતેજસા ।
રુરુઃ શ્રુત્વા તદાક્રન્દં દર્શનાર્થં સમાગતઃ ॥ ૯॥

દદર્શ પતિતાં તત્ર સજીવામિવ કામિનીમ્ ।
રુદન્તં સ્થૂલકેશં ચ દૃષ્ટ્વાન્યાનૃષિસત્તમાન્ ॥ ૧૦॥

રુરુઃ સ્થાનાદ્બહિર્ગત્વા રુરોદ વિરહાકુલઃ ।
અહો દૈવેન સર્પોઽયં પ્રેષિતઃ પરમાદ્ભુતઃ ॥ ૧૧॥

મમ શર્મવિઘાતાય દુઃખહેતુરયં કિલ ।
કિં કરોમિ ક્વ ગચ્છામિ મૃતા મે પ્રાણવલ્લભા ॥ ૧૨॥

ન વૈ જીવિતુમિચ્છામિ વિયુક્તઃ પ્રિયયાનયા ।
નાલિઙ્ગિતા વરારોહા ન મયા ચુમ્બિતા મુખે ॥ ૧૩॥

ન પાણિગ્રહણં પ્રાપ્તં મન્દભાગ્યેન સર્વથા ।
લાજાહોમસ્તથા ચાગ્નૌ ન કૃતસ્ત્વનયા સહ ॥ ૧૪॥

માનુષ્યં ધિગિદં કામં ગચ્છન્ત્વદ્ય મમાસવઃ ।
દુઃખિતસ્ય ન વા મૃત્યુર્વાઞ્છિતઃ સમુપૈતિ હિ ॥ ૧૫॥

સુખં તર્હિ કથં દિવ્યમાપ્યતે ભુવિ વાઞ્છિતમ્ ।
પ્રપતામિ હ્રદે ઘોરે પાવકે પ્રપતામ્યહમ્ ॥ ૧૬॥

વિષમદ્મિ ગલે પાશં કૃત્વા પ્રાણાંસ્ત્યજામ્યહમ્ ।

વિલપ્યૈવં રુરુસ્તત્ર વિચાર્ય મનસા પુનઃ ॥ ૧૭॥

ઉપાયં ચિન્તયામાસ સ્થિતસ્તસ્મિન્નદીતટે ।
મરણાત્કિં ફલં મે સ્યાદાત્મહત્યા દુરત્યયા ॥ ૧૮॥

દુઃખિતશ્ચ પિતા મે સ્યાજ્જનની ચાતિદુઃખિતા ।
દૈવસ્તુષ્ટો ભવેત્કામં દૃષ્ટ્વા માં ત્યક્તજીવિતમ્ ॥ ૧૯॥

સર્વઃ પ્રમુદિતશ્ચ સ્યાન્મત્ક્ષયે નાત્ર સંશયઃ ।
ઉપકારઃ પ્રિયાયાઃ કઃ પરલોકે ભવેદપિ ॥ ૨૦॥

મૃતે મય્યાત્મઘાતેન વિરહાત્પીડિતેઽપિ ચ ।
પરલોકે પ્રિયા સાપિ ન મે સ્યાદાત્મઘાતિનઃ ॥ ૨૧॥

એતદર્થં મૃતે દોષા મયિ નૈવામૃતે પુનઃ ।
વિમૃશ્યૈવ રુરુસ્તત્ર સ્નાત્વાચમ્ય શુચિઃ સ્થિતઃ ॥ ૨૨॥

અબ્રવીદ્વચનં કૃત્વા જલં પાણાવસૌ મુનિઃ ।
યન્મયા સુકૃતં કિઞ્ચિત્કૃતં દેવાર્ચનાદિકમ્ ॥ ૨૩॥

ગુરવઃ પૂજિતા ભક્ત્યા હુતં જપ્તં તપઃ કૃતમ્ ।
અધીતાસ્ત્વખિલા વેદા ગાયત્રી સંસ્કૃતા યદિ ॥ ૨૪॥

રવિરારાધિતસ્તેન સઞ્જીવતુ મમ પ્રિયા ।
યદિ જીવેન્ન મે કાન્તા ત્યજે પ્રાણાનહં તતઃ ॥ ૨૫॥

ઇત્યુક્ત્વા તજ્જલં ભૂમૌ ચિક્ષેપારાધ્ય દેવતાઃ ।
રાજોવાચ ।
એવં વિલપતસ્તસ્ય ભાર્યયા દુઃખિતસ્ય ચ ॥ ૨૬॥

દેવદૂતસ્તદાભ્યેત્ય વાક્યમાહ રુરું તતઃ ।
દેવદૂત ઉવાચ ।
માકાર્ષીઃ સાહસં બ્રહ્મન્કથં જીવેન્મૃતા પ્રિયા ॥ ૨૭॥

ગતાયુરેષા સુશ્રોણી ગન્ધર્વાપ્સરસોઃ સુતા ।
અન્યાં કામય ચાર્વઙ્ગીં મૃતેયં ચાવિવાહિતા ॥ ૨૮॥

કિં રોદિષિ સુદુર્બુદ્ધે કા પ્રીતિસ્તેઽનયા સહ ।
રુરુરુવાચ ।
દેવદૂત ન ચાન્યાં વૈ વરિષ્યામ્યહમઙ્ગનામ્ ॥ ૨૯॥

યદિ જીવેન્ન જીવેદ્વા મર્તવ્યં ચાધુના મયા ।
રાજોવાચ ।
વિદિત્વેતિ હઠં તસ્ય દેવદૂતો મુદાન્વિતઃ ॥ ૩૦॥

ઉવાચ વચનં તથ્યં સત્યં ચાતિમનોહરમ્ ।
ઉપાયં શૃણુ વિપ્રેન્દ્ર વિહિતં યત્સુરૈઃ પુરા ॥ ૩૧॥

આયુષોઽર્ધપ્રદાનેન જીવયાશુ પ્રમદ્વરામ્ ।
રુરુરુવાચ ।
આયુષોઽર્ધં પ્રયચ્છામિ કન્યાયૈ નાત્ર સંશયઃ ॥ ૩૨॥

અદ્ય પ્રત્યાવૃતપ્રાણા પ્રોત્તિષ્ઠતુ મમ પ્રિયા ।
વિશ્વાવસુસ્તદા તત્ર વિમાનેન સમાગતઃ ॥ ૩૩॥

જ્ઞાત્વા પુત્રીં મૃતાં ચાશુ સ્વર્ગલોકાત્પ્રમદ્વરામ્ ।
તતો ગન્ધર્વરાજશ્ચ દેવદૂતશ્ચ સત્તમઃ ॥ ૩૪॥

ધર્મરાજમુપેત્યેદં વચનં પ્રત્યભાષતામ્ ।
ધર્મરાજ રુરોઃ પત્ની સુતા વિશ્વાવસોસ્તથા ॥ ૩૫॥

મૃતા પ્રમદ્વરા કન્યા દષ્ટા સર્પેણ ચાધુના ।
સા રુરોરાયુષોઽર્ધેન મર્તુકામસ્ય સૂર્યજ ॥ ૩૬॥

સમુત્તિષ્ઠતુ તન્વઙ્ગી વ્રતચર્યાપ્રભાવતઃ ।
ધર્મ ઉવાચ ।
વિશ્વાવસુસુતાં કન્યાં દેવદૂત યદીચ્છસિ ॥ ૩૭॥

ઉત્તિષ્ઠત્વાયુષોઽર્ધેન રુરું ગત્વા ત્વમર્પય ।
રાજોવાચ ।
એવમુક્તસ્તતો ગત્વા જીવયિત્વા પ્રમદ્વરામ્ ॥ ૩૮॥

રુરોઃ સમર્પયામાસ દેવદૂતસ્ત્વરાન્વિતઃ ।
તતઃ શુભેઽહ્નિ વિધિના રુરુણાપિ વિવાહિતા ॥ ૩૯॥

ઇત્થં ચોપાયયોગેન મૃતાપ્યુજ્જીવિતા તદા ।
ઉપાયસ્તુ પ્રકર્તવ્યઃ સર્વથા શાસ્ત્રસમ્મતઃ ॥ ૪૦॥

મણિમન્ત્રૌષધીભિશ્ચ વિધિવત્પ્રાણરક્ષણે ।
ઇત્યુક્ત્વા સચિવાન્ રાજા કલ્પયિત્વા સુરક્ષકાન્ ॥ ૪૧॥

કારયિત્વાથ પ્રાસાદં સપ્તભૂમિકમુત્તમમ્ ।
આરુરોહોત્તરાસૂનુઃ સચિવૈઃ સહ તત્ક્ષણમ્ ॥ ૪૨॥

મણિમન્ત્રધરાઃ શૂરાઃ સ્થાપિતાસ્તત્ર રક્ષણે ।
પ્રેષયામાસ ભૂપાલો મુનિં ગૌરમુખં તતઃ ॥ ૪૩॥

પ્રસાદાર્થં સેવકસ્ય ક્ષમસ્વેતિ પુનઃ પુનઃ ।
બ્રાહ્મણાન્સિદ્ધમન્ત્રજ્ઞાન્ રક્ષણાર્થમિતસ્તતઃ ॥ ૪૪॥

મન્ત્રિપુત્રઃ સ્થિતસ્તત્ર સ્થાપયામાસ દન્તિનઃ ।
ન કશ્ચિદારુહેત્તત્ર પ્રાસાદે ચાતિરક્ષિતે ॥ ૪૫॥

વાતોઽપિ ન ચરેત્તત્ર પ્રવેશે વિનિવાર્યતે ।
ભક્ષ્યભોજ્યાદિકં રાજા તત્રસ્થશ્ચ ચકાર સઃ ॥ ૪૬॥

સ્નાનસન્ધ્યાદિકં કર્મ તત્રૈવ વિનિવર્ત્ય ચ ।
રાજકાર્યાણિ સર્વાણિ તત્રસ્થશ્ચાકરોન્નૃપઃ ॥ ૪૭॥

મન્ત્રિભિઃ સહ સમ્મન્ત્ર્ય ગણયન્દિવસાનપિ ।
કશ્ચિચ્ચ કશ્યપો નામ બ્રાહ્મણો મન્ત્રિસત્તમઃ ॥ ૪૮॥

શુશ્રાવ ચ તથા શાપં પ્રાપ્તં રાજ્ઞા મહાત્મના ।
સ ધનાર્થી દ્વિજશ્રેષ્ઠઃ કશ્યપઃ સમચિન્તયત્ ॥ ૪૯॥

વ્રજામિ તત્ર યત્રાસ્તે શપ્તો રાજા દ્વિજેન હ ।
ઇતિ કૃત્વા મતિં વિપ્રઃ સ્વગૃહાન્નિઃસૃતઃ પથિ ॥ ૫૦॥

કશ્યપો મન્ત્રવિદ્વિદ્વાન્ધનાર્થી મુનિસત્તમઃ ॥ ૫૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં દ્વિતીયસ્કન્ધે
પરીક્ષિદ્રાજ્ઞો ગુપ્તગૃહે વાસવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૯॥

## ૨.૧૦ દશમોઽધ્યાયઃ । પરીક્ષિન્મરણમ્ ।

સૂત ઉવાચ ।
તસ્મિન્નેવ દિને નામ્ના તક્ષકસ્તં નૃપોત્તમમ્ ।
શપ્તં જ્ઞાત્વા ગૃહાત્તૂર્ણં નિઃસૃતઃ પુરુષોત્તમઃ ॥ ૧॥

વૃદ્ધબ્રાહ્મણવેષેણ તક્ષકઃ પથિ નિર્ગતઃ ।
અપશ્યત્કશ્યપં માર્ગે વ્રજન્તં નૃપતિં પ્રતિ ॥ ૨॥

તમપૃચ્છત્પન્નગોઽસૌ બ્રાહ્મણં મન્ત્રવાદિનમ્ ।
ક્વ ભવાંસ્ત્વરિતો યાતિ કિઞ્ચ કાર્યં ચિકીર્ષતિ ॥ ૩॥

કશ્યપ ઉવાચ ।
પરીક્ષિતં નૃપશ્રેષ્ઠં તક્ષકશ્ચ પ્રધક્ષ્યતિ ।
તત્રાહં ત્વરિતો યામિ નૃપં કર્તુમપજ્વરમ્ ॥ ૪॥

મન્ત્રોઽસ્તિ મમ વિપ્રેન્દ્ર વિષનાશકરઃ કિલ ।
જીવયિષ્યામ્યહં તં વૈ જીવિતવ્યેઽધુના કિલ ॥ ૫॥

તક્ષક ઉવાચ ।
અહં સ પન્નગો બ્રહ્મંસ્તં ધક્ષ્યામિ મહીપતિમ્ ।
નિવર્તસ્વ ન શક્તસ્ત્વં મયા દષ્ટં ચિકિત્સિતુમ્ ॥ ૬॥

કશ્યપ ઉવાચ ।
અહં દષ્ટં ત્વયા સર્પ નૃપં શપ્તં દ્વિજેન વૈ ।
જીવયિષ્યામ્યસન્દેહં કામં મન્ત્રબલેન વૈ ॥ ૭॥

તક્ષક ઉવાચ ।
યદિ ત્વં જીવિતું યાસિ મયા દષ્ટં નૃપોત્તમમ્ ।
મન્ત્રશક્તિબલં વિપ્ર દર્શય ત્વં મમાનઘ ॥ ૮॥

ધક્ષ્યામ્યેનં ચ ન્યગ્રોધં વિષદંષ્ટ્રાભિરદ્ય વૈ ।
કશ્યપ ઉવાચ ।
જીવયિષ્યે ત્વયા દષ્ટં દગ્ધં વા પન્નગોત્તમ ॥ ૯॥

સૂત ઉવાચ ।
અદશત્પન્નગો વૃક્ષં ભસ્મસાચ્ચ ચકાર તમ્ ।
ઉવાચ કશ્યપં ભૂયો જીવયૈનં દ્વિજોત્તમ ॥ ૧૦॥

દૃષ્ટ્વા ભસ્મીકૃતં વૃક્ષં પન્નગેન વિષાગ્નિના ।
સર્વં ભસ્મ સમાહૃત્ય કશ્યપો વાક્યમબ્રવીત્ ॥ ૧૧॥

પશ્ય મન્ત્રબલં મેઽદ્ય ન્યગ્રોધં પન્નગોત્તમ ।
જીવયામ્યદ્ય વૃક્ષં વૈ પશ્યતસ્તે મહાવિષ ॥ ૧૨॥

ઇત્યુક્ત્વા જલમાદાય કશ્યપો મન્ત્રવિત્તમઃ ।
સિષેચ ભસ્મરાશિં તં મન્ત્રિતેનૈવ વારિણા ॥ ૧૩॥

તદ્વારિસેચનાજ્જાતો ન્યગ્રોધઃ પૂર્વવચ્છુભઃ ।
વિસ્મયં તક્ષકઃ પ્રાપ્તો દૃષ્ટ્વા તં જીવિતં નગમ્ ॥ ૧૪॥

તમાહ કશ્યપં નાગઃ કિમર્થં તે પરિશ્રમઃ ।
સમ્પાદયામિ તં કામં બ્રૂહિ વાડવ વાઞ્છિતમ્ ॥ ૧૫॥

કશ્યપ ઉવાચ ।
વિત્તાર્થી નૃપતિં મત્વા શપ્તં પન્નગ નિઃસૃતઃ ।
ગૃહાદહં ચોપકર્તું વિદ્યયા નૃપસત્તમમ્ ॥ ૧૬॥

તક્ષક ઉવાચ ।
વિત્તં ગૃહાણ વિપ્રેન્દ્ર યાવદિચ્છસિ પાર્થિવાત્ ।
દદામિ સ્વગૃહં યાહિ સકામોઽહં ભવામ્યતઃ ॥ ૧૭॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય કશ્યપઃ પરમાર્થવિત્ ।
ચિન્તયામાસ મનસા કિં કરોમિ પુનઃ પુનઃ ॥ ૧૮॥

ધનં ગહીત્વા સ્વગૃહં પ્રયામિ યદ્યહં પુનઃ ।
ભવિષ્યતિ ન મે કીર્તિર્લોકે લોભસમાશ્રયાત્ ॥ ૧૯॥

જીવિતેઽથ નૃપશ્રેષ્ઠે કીર્તિઃ સ્યાદચલા મમ ।
ધનપ્રાપ્તિશ્ચ બહુધા ભવેત્પુણ્યં ચ જીવનાત્ ॥ ૨૦॥

રક્ષણીયં યશઃ કામં ધિગ્ધનં યશસા વિના ।
સર્વસ્વં રઘુણા પૂર્વં દત્તં વિપ્રાય કીર્તયે ॥ ૨૧॥

હરિશ્ચન્દ્રેણ કર્ણેન કીર્ત્યર્થં બહુવિસ્તરમ્ ।
ઉપેક્ષેયં કથં ભૂપં દહ્યમાનં વિષાગ્નિના ॥ ૨૨॥

જીવિતેઽધ મયા રાજ્ઞિ સુખં સર્વજનસ્ય ચ ।
અરાજકે પ્રજાનાશો ભવિતા નાત્ર સંશયઃ ॥ ૨૩॥

પ્રજાનાશસ્ય પાપં મે ભવિષ્યતિ મૃતે નૃપે ।
અપકીર્તિશ્ચ લોકેષુ ધનલોભાદ્ભવિષ્યતિ ॥ ૨૪॥

ઇતિ સઞ્ચિન્ત્ય મનસા ધ્યાનં કૃત્વા સ કશ્યપઃ ।
ગતાયુષં ચ નૃપતિં જ્ઞાતવામ્બુદ્ધિમત્તરઃ ॥ ૨૫॥

આસન્નમૃત્યું રાજાનં જ્ઞાત્વા ધ્યાનેન કશ્યપઃ ।
ગૃહં યયૌ સ ધર્માત્મા ધનમાદાય તક્ષકાત્ ॥ ૨૬॥

નિવર્ત્ય કશ્યપં સર્પઃ સપ્તમે દિવસે નૃપમ્ ।
હન્તુકામો જગામાશુ નગરં નાગસાહ્વયમ્ ॥ ૨૭॥

શુશ્રાવ નગરસ્યાન્તે પ્રાસાદસ્થં પરીક્ષિતમ્ ।
મણિમન્ત્રૌષધૈઃ કામં રક્ષ્યમાણમતન્દ્રિતમ્ ॥ ૨૮॥

ચિન્તાવિષ્ટસ્તદા નાગો વિપ્રશાપભયાકુલઃ ।
ચિન્તયામાસ યોગેન પ્રવિશેયં ગૃહં કથમ્ ॥ ૨૯॥

વઞ્ચયામિ કથં ચૈનં રાજાનં પાપકારિણમ્ ।
વિપ્રશાપાદ્ધતં મૂઢં વિપ્રપીડાકરં શઠમ્ ॥ ૩૦॥

પાણ્ડવાનાં કુલે જાતઃ કોઽપિ નૈતાદૃશો ભવેત્ ।
તાપસસ્ય ગલે યેન મૃતઃ સર્પો નિવેશિતઃ ॥ ૩૧॥

કૃત્વા વિગર્હિતં કર્મ જાનન્કાલગતિં નૃપઃ ।
રક્ષકાન્ભવને કૃત્વા પ્રાસાદમભિગમ્ય ચ ॥ ૩૨॥

મૃત્યું વઞ્ચયતે રાજા વર્તતેઽદ્ય નિરાકુલઃ ।
તં કથં ધક્ષયિષ્યામિ વિપ્રવાક્યેન ચોદિતઃ ॥ ૩૩॥

ન જાનાતિ ચ મન્દાત્મા મરણં હ્યનિવર્તનમ્ ।
તેનાસૌ રક્ષકાન્સ્થાપ્ય સૌધારૂઢોઽદ્ય મોદતે ॥ ૩૪॥

યદિ વૈ વિહિતો મૃત્યુર્દૈવેનામિતતેજસા ।
સ કથં પરિવર્તેત કૃતૈર્યત્નૈસ્તુ કોટિભિઃ ॥ ૩૫॥

પાણ્ડવસ્ય ચ દાયાદો જાનન્મૃત્યું ગતં નૃપઃ ।
જીવને મતિમાસ્થાય સ્થિતઃ સ્થાને નિરાકુલઃ ॥ ૩૬॥

દાનપુણ્યાદિકં રાજા કર્તુમર્હતિ સર્વથા ।
ધર્મેણ હન્યતે વ્યાધિર્યેનાયુઃ શાશ્વતં ભવેત્ ॥ ૩૭॥

નોચેન્મૃત્યુવિધિં કૃત્વા સ્નાનદાનાદિકાઃ ક્રિયાઃ ।
મરણં સ્વર્ગલોકાય નરકાયાન્યથા ભવેત્ ॥ ૩૮॥

દ્વિજપીડાકૃતં પાપં પૃથગ્વાસ્ય ચ ભૂપતેઃ ।
વિપ્રશાપસ્તથા ઘોર આસન્ને મરણે કિલ ॥ ૩૯॥

ન કોઽપિ બ્રાહ્મણઃ પાર્શ્વે ચ એનં પ્રતિબોધયેત્ ।
વેધસા વિહિતો મૃત્યુરનિવાર્યસ્તુ સર્વથા ॥ ૪૦॥

ઇતિ સઞ્ચિન્ત્ય સર્પોઽસૌ સ્વાન્નાગાન્નિકટે સ્થિતાન્ ।
કૃત્વા તાપસવેષાંસ્તાન્પ્રાહિણોત્સુભુજઙ્ગમાન્ ॥ ૪૧॥

ફલમૂલાદિકં ગૃહ્ય રાજ્ઞે નાગોઽથ તક્ષકઃ ।
સ્વયં ચ કીટરૂપેણ ફલમધ્યે સસાર હ ॥ ૪૨॥

નિર્ગતાસ્તે તદા નાગાઃ ફલાન્યાદાય સત્વરાઃ ।
તે રાજભવનં પ્રાપ્ય સ્થિતાઃ પ્રાસાદસન્નિધૌ ॥ ૪૩॥

રક્ષકાસ્તાપસાન્દૃષ્ટ્વા પપ્રચ્છુસ્તચ્ચિકીર્ષિતમ્ ।
ઊચુસ્તે ભૂપતિં દ્રષ્ટું પ્રાપ્તાઃ સ્મોઽદ્ય તપોવનાત્ ॥ ૪૪॥

અભિમન્યુસુતં વીરં કુલાર્કં ચારુદર્શનમ્ ।
પરિવર્ધયિતું પ્રાપ્તા મન્ત્રૈરાથર્વણૈસ્તથા ॥ ૪૫॥

નિવેદયધ્વં રાજાનં દર્શનાર્થાગતાન્મુનીન્ ।
કૃત્વાભિષેકાન્યાસ્યામો દત્ત્વા મિષ્ટફલાનિચ ॥ ૪૬॥

ભારતાનાં કુલે વાપિ ન દૃષ્ટા દ્વારરક્ષકાઃ ।
ન શ્રુતં તાપસાનાં તુ રાજ્ઞોઽસન્દર્શનં કિલ ॥ ૪૭॥

આરોહામો વયં તત્ર યત્ર રાજા પરીક્ષિતઃ ।
આશીર્ભિર્વર્ધયિત્વૈનં દત્તાજ્ઞાઃ પ્રવ્રજામહે ॥ ૪૮॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં તાપસાનાં તુ રક્ષકાઃ ।
પ્રત્યૂચુસ્તાન્ દ્વિજાન્મત્વા નિદેશં ભૂપતેર્યથા ॥ ૪૯॥

નાદ્ય વો દર્શનં વિપ્રા રાજ્ઞઃ સ્યાદિતિ નો મતિઃ ।
શ્વઃ સર્વતાપસૈરત્ર ત્વાગન્તવ્યં નૃપાલયે ॥ ૫૦॥

અનારોહસ્તુ પ્રાસાદો વિપ્રાણાં મુનિસત્તમાઃ ।
વિપ્રશાપભયાદ્રાજ્ઞા વિહિતોઽસ્તિ ન સંશયઃ ॥ ૫૧॥

તદોચુસ્તાનથો વિપ્રાઃ ફલમૂલજલાનિ ચ ।
વિપ્રાશિષશ્ચ રાજ્ઞેઽથ ગ્રાહયન્તુ સુરક્ષકાઃ ॥ ૫૨॥

તે ગત્વા નૃપતિં પ્રોચુસ્તાપસાનાગતાઞ્જનાઃ ।
રાજોવાચાનયધ્વં વૈ ફલમૂલાદિકં ચ યત્ ॥ ૫૩॥

પૃચ્છધ્વં તાપસાન્કાર્યં પ્રાતરાગમનં પુનઃ ।
પ્રણામં કથયધ્વં મે નાદ્ય સન્દર્શનં મમ ॥ ૫૪॥

તે ગત્વાથ સમાદાય ફલમૂલાદિકં ચ યત્ ।
રાજ્ઞે સમર્પયામાસુર્બહુમાનપુરઃસરમ્ ॥ ૫૫॥

ગતેષુ તેષુ નાગેષુ વિપ્રવેષાવૃતેષુ ચ ।
ફલાન્યાદાય રાજાસૌ સચિવાનિદમબ્રવીત્ ॥ ૫૬॥

સુહૃદો ભક્ષયન્ત્વદ્ય ફલાન્યેતાનિ સર્વશઃ ।
અદ્મ્યહં ચૈકમેતદ્વૈ ફલં વિપ્રાર્પિતં મહત્ ॥ ૫૭॥

ઇત્યુક્ત્વા તત્ફલં દત્ત્વા સુહૃદ્ભ્યશ્ચોત્તરાસુતઃ ।
કરે કૃત્વા ફલં પક્વં દદાર નૃપતિઃ સ્વયમ્ ॥ ૫૮॥

વિદારિતં ફલં રાજ્ઞા તત્ર કૃમિરભૂદણુઃ ।
સ કૃષ્ણનયનસ્તામ્રો દૃષ્ટો ભૂપતિના સ્વયમ્ ॥ ૫૯॥

તં દૃષ્ટ્વા નૃપતિઃ પ્રાહ સચિવાન્વિસ્મિતાનથ ।
અસ્તમભ્યેતિ સવિતા વિષાદદ્ય ન મે ભયમ્ ॥ ૬૦॥

અઙ્ગીકરોમિ તં શાપં કૃમિકો માં દશત્વયમ્ ।
એવમુક્ત્વા સ રાજેન્દ્રો ગ્રીવાયાં સંન્યવેશયત્ ॥ ૬૧॥

અસ્તં યાતે દિવાનાથે ધૃતઃ કણ્ઠેઽથ કીટકઃ ।
તક્ષકસ્તુ તદા જાતઃ કાલરૂપી ભયાનકઃ ॥ ૬૨॥

રાજા સંવેષ્ટિતસ્તેન દષ્ટશ્ચાપિ મહીપતિઃ ।
મન્ત્રિણો વિસ્મયં પ્રાપ્તા રુરુદુર્ભૃશદુઃખિતાઃ ॥ ૬૩॥

ઘોરરૂપમહિં વીક્ષ્ય દુદ્રુવુસ્તે ભયાર્દિતાઃ ।
ચુક્રુશૂ રક્ષકાઃ સર્વે હાહાકારો મહાનભૂત્ ॥ ૬૪॥

વેષ્ટિતો ભોગિભોગેન વિનષ્ટબહુપૌરુષઃ ।
નોવાચ નૃપતિઃ કિઞ્ચિન્ન ચચાલોત્તરાસુતઃ ॥ ૬૫॥

ઉત્થિતાગ્નિશિખા ઘોરા વિષજા તક્ષકાનનાત્ ।
પ્રજજ્વાલ નૃપં ત્વાશુ ગતપ્રાણં ચકાર હ ॥ ૬૬॥

હત્વાશુ જીવિતં રાજ્ઞસ્તક્ષકો ગગને ગતઃ ।
જગદ્દગ્ધં તુ કુર્વાણં દદૃશુસ્તં જના ઇહ ॥ ૬૭॥

સ પપાત ગતપ્રાણો રાજા દગ્ધ ઇવ દ્રુમઃ ।
ચુકુશુશ્ચ જનાઃ સર્વે મૃતં દૃષ્ટ્વા નરાધિપમ્ ॥ ૬૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે પરીક્ષિન્મરણં નામ દશમોઽધ્યાયઃ ॥ ૨.૧૦॥

## ૨.૧૧ એકાદશોઽધ્યાયઃ । સર્પસત્રવર્ણનમ્ ।

સૂત ઉવાચ ।
ગતપ્રાણં તુ રાજાનં બાલં પુત્રં સમીક્ષ્ય ચ ।
ચક્રુશ્ચ મન્ત્રિણઃ સર્વે પરલોકસ્ય સત્ક્રિયાઃ ॥ ૧॥

ગઙ્ગાતીરે દગ્ધદેહં ભસ્મપ્રાયં મહીપતિમ્ ।
અગુરુભિશ્ચાભિયુક્તાયાં ચિતાયામધ્યરોપયન્ ॥ ૨॥

દુર્મરણે મૃતસ્યાસ્ય ચકુશ્ચૈવૌર્ધ્વદૈહિકીમ્ ।
ક્રિયાં પુરોહિતાસ્તસ્ય વેદમન્ત્રૈર્વિધાનતઃ ॥ ૩॥

દદુર્દાનાનિ વિપ્રેભ્યો ગાઃ સુવર્ણં યથોચિતમ્ ।
અન્નં બહુવિધં તત્ર વસ્ત્રાણિ વિવિધાનિ ચ ॥ ૪॥

સુમુહૂર્તે સુતં બાલં પ્રજાનાં પ્રીતિવર્ધનમ્ ।
સિંહાસને શુભે તત્ર મન્ત્રિણઃ સંન્યવેશયન્ ॥ ૫॥

પૌરા જાનપદા લોકાશ્ચક્રુસ્તં નૃપતિં શિશુમ્ ।
જનમેજયનામાનં રાજલક્ષણસંયુતમ્ ॥ ૬॥

ધાત્રેયી શિક્ષયામાસ રાજચિહ્નાનિ સર્વશઃ ।
દિને દિને વર્ધમાનઃ સ બભૂવ મહામતિઃ ॥ ૭॥

પ્રાપ્તે ચૈકાદશે વર્ષે તસ્મૈ કુલપુરોહિતઃ ।
યથોચિતાં દદૌ વિદ્યાં જગ્રાહ સ યથોચિતામ્ ॥ ૮॥

ધનુર્વેદં કૃપઃ પૂર્ણં દદાવસ્મૈ સુસંસ્કૃતમ્ ।
અર્જુનાય યથા દ્રોણઃ કર્ણાય ભાર્ગવો યથા ॥ ૯॥

સમ્પ્રાપ્તવિદ્યો બલવાન્વભૂવ દુરતિક્રમઃ ।
ધનુર્વેદે તથા વેદે પારગઃ પરમાર્થવિત્ ॥ ૧૦॥

ધર્મશાસ્ત્રાર્થકુશલઃ સત્યવાદી જિતેન્દ્રિયઃ ।
ચકાર રાજ્યં ધર્માત્મા પુરા ધર્મસુતો યથા ॥ ૧૧॥

તતઃ સુવર્ણવર્માખ્યો રાજા કાશિપતિઃ કિલ ।
વપુષ્ટમાં શુભા કન્યાં દદૌ પારીક્ષિતાય ચ ॥ ૧૨॥

સ તાં પ્રાપ્યાસિતાપાઙ્ગીં મુમુદે જનમેજયઃ ।
કાશિરાજસુતાં કાન્તાં પ્રાપ્ય રાજા યથા પુરા ॥ ૧૩॥

વિચિત્રવીર્યો મુમુદે સુભદ્રાં ચ યથાર્જુનઃ ।
વિજહાર મહીપાલો વનેષૂપવનેષુ ચ ॥ ૧૪॥

તયા કમલપત્રાક્ષ્યા શચ્યા શતક્રતુર્યથા ।
પ્રજાસ્તસ્ય સુસન્તુષ્ટા બભૂવુઃ સુખલાલિતાઃ ॥ ૧૫॥

મન્ત્રિણઃ કર્મકુશલાશ્ચક્રુઃ કાર્યાણિ સર્વશઃ ।
એતસ્મિન્નેવ કાલે તુ મુનિરુત્તઙ્કનામકઃ ॥ ૧૬॥

તક્ષકેણ પરિક્લિષ્ટો હસ્તિનાપુરમભ્યગાત્ ।
વૈરસ્યાપચિતિં કોઽસ્ય પ્રકુર્યાદિતિ ચિન્તયન્ ॥ ૧૭॥

પરીક્ષિતસુતં મત્વા તં નૃપં સમુપાગતઃ ।
કાર્યાકાર્યં ન જાનાસિ સમયે નૃપસત્તમ ॥ ૧૮॥

અકર્તવ્યં કરોષ્યદ્ય કર્તવ્યં ન કરોષિ વૈ ।
કિં ત્વાં સમ્પ્રાર્થયામ્યદ્ય ગતામર્ષં નિરુદ્યમમ્ ॥ ૧૯॥

અવૈરજ્ઞમતન્ત્રજ્ઞં બાલચેષ્ટાસમન્વિતમ્ ।
જનમેજય ઉવાચ ।
કિં વૈરં ન મયા જ્ઞાતં ન કિં પ્રતિકૃતં મયા ॥ ૨૦॥

તદ્વદ ત્વં મહાભાગ કરોમિ યદનન્તરમ્ ।
ઉત્તઙ્ક ઉવાચ ।
પિતા તે નિહતો ભૂપ તક્ષકેણ દુરાત્મના ॥ ૨૧॥

મન્ત્રિણસ્ત્વં સમાહૂય પૃચ્છ સ્વપિતૃનાશનમ્ ।
સૂત ઉવાચ ।

તચ્છ્રુત્વા વચનં રાજા પપ્રચ્છ મન્ત્રિસત્તમાન્ ॥ ૨૨॥

ઊચુસ્તે દ્વિજશાપેન દષ્ટઃ સર્પેણ વૈ મૃતઃ ।
જનમેજય ઉવાચ ।
શાપોઽત્ર કારણં રાજ્ઞઃ શપ્તસ્ય મુનિના કિલ ॥ ૨૩॥

તક્ષકસ્ય તુ કો દોષો બ્રૂહિ મે મુનિસત્તમ ।
ઉત્તઙ્ક ઉવાચ ।
તક્ષકેણ ધનં દત્ત્વા કશ્યપઃ સન્નિવારિતઃ ॥ ૨૪॥

ન સ કિં તક્ષકો વૈરી પિતૃહા તવ ભૂપતે ।
ભાર્યા રુરોઃ પુરા ભૂપ દષ્ટા સર્પેણ સા મૃતા ॥ ૨૫॥

અવિવાહિતા તુ મુનિના જીવિતા ચ પુનઃ પ્રિયા ।
રુરુણાપિ કૃતા તત્ર પ્રતિજ્ઞા ચાતિદારુણા ॥ ૨૬॥

યં યં સર્પં પ્રપશ્યામિ તં તં હન્મ્યાયુધેન વૈ ।
એવં કૃત્વા પ્રતિજ્ઞાં સ શસ્ત્રપાણી રુરુસ્તદા ॥ ૨૭॥

વ્યચરત્પૃથિવીં રાજન્નિઘ્નન્સર્પાન્યતસ્તતઃ ।
એકદા સ વને ઘોરં ડુણ્ડુભં જરસાન્વિતમ્ ॥ ૨૮॥

અપશ્યદ્દણ્ડમુદ્યમ્ય હન્તું તં સમુપાયયૌ ।
અભ્યહન્રુષિતો વિપ્રસ્તમુવાચાથ ડુણ્ડુભઃ ॥ ૨૯॥

નાપરાદ્ધોમિ તે વિપ્ર કસ્માન્મામભિહંસિ વૈ ।
રુરુરુવાચ ।
પ્રાણપ્રિયા મે દયિતા દષ્ટા સર્પેણ સા મૃતા ॥ ૩૦॥

પ્રતિજ્ઞેયં તદા સર્પ દુઃખિતેન મયા કૃતા ।
ડુણ્ડુભ ઉવાચ ।
નાહં દશામિ તેઽન્યે વૈ યે દશન્તિ ભુજઙ્ગમાઃ ॥ ૩૧॥

શરીરસમયોગેન ન માં હિંસિતુમર્હસિ ।
ઉત્તઙ્ક ઉવાચ ।
શ્રુત્વા તાં માનુષીં વાણીં સર્પેણોક્તાં મનોહરામ્ ॥ ૩૨॥

રુરુઃ પપ્રચ્છ કોઽસિ ત્વં કસ્માદ્ડુણ્ડુભતાં ગતઃ ।
સર્પ ઉવાચ ।

બ્રાહ્મણોઽહં પુરા વિપ્ર સખા મે ખગમાભિધઃ ॥ ૩૩॥

વિપ્રો ધર્મભૃતાં શ્રેષ્ઠઃ સત્યવાદી જિતેન્દ્રિયઃ ।
સ મયા વઞ્જિતો મૌર્ખ્યાત્સર્પં કૃત્વા ચ તાર્ણકમ્ ॥ ૩૪॥

ભયં ચ પ્રાપિતોઽત્યર્થમગ્નિહોત્રગૃહે સ્થિતઃ ।
તેન ભીતેન શપ્તોઽહં વિહ્વલેનાતિવેપિના ॥ ૩૫॥

ભવ સર્પો મન્દબુદ્ધે યેનાહં ધર્ષિતસ્ત્વયા ।
મયા પ્રસાદિતોઽત્યર્થં સર્પેણાસૌ દ્વિજોત્તમઃ ॥ ૩૬॥

મામુવાચાથ તત્ક્રોધાત્કિઞ્ચિચ્છાન્તિમવાપ્ય ચ ।
રુરુસ્તે મોચિતા શાપસ્યાસ્ય સર્પ ભવિષ્યતિ ॥ ૩૭॥

પ્રમતેસ્તુ સુતો નૂનમિતિ માં સોઽબ્રવીદ્વચઃ ।
સોઽહં સર્પો રુરુસ્ત્વં ચ શ‍ૃણુ મે પરમં વચઃ ॥ ૩૮॥

અહિંસા પરમો ધર્મો વિપ્રાણાં નાત્ર સંશયઃ ।
દયા સર્વત્ર કર્તવ્યા બ્રાહ્મણેન વિજાનતા ॥ ૩૯॥

યજ્ઞાદન્યત્ર વિપ્રેન્દ્ર ન હિંસા યાજ્ઞિકો મતા ।
સૂત ઉવાચ ।
સર્પયોનેર્વિનિર્મુક્તો બાહ્મણોઽસૌ રુરુસ્તતઃ ॥ ૪૦॥

કૃત્વા તસ્ય ચ શાપાન્તં પરિત્યક્તં ચ હિંસનમ્ ।
વિવાહિતા તેન બાલા મૃતા સજ્જીવિતા પુનઃ ॥ ૪૧॥

કદનં સર્વસર્પાણાં કૃતં વૈરમનુસ્મરન્ ।
ત્વં તુ વૈરં સમુત્સૃજ્ય વર્તસે પન્નગેષ્વથ ॥ ૪૨॥

વિમન્યુર્ભરતશ્રેષ્ઠ પિતૃઘાતકરેષુ વૈ ।
અન્તરિક્ષે મૃતસ્તાતઃ સ્નાનદાનવિવર્જિતઃ ॥ ૪૩॥

તસ્યોદ્ધારં ચ રાજેન્દ્ર કુરુ હત્વાથ પન્નગાન્ ।
પિતુર્વૈરં ન જાનાતિ જીવન્નેવ મૃતો હિ સઃ ॥ ૪૪॥

દુર્ગતિસ્તે પિતુસ્તાવદ્યાવત્તાન્ન હનિષ્યસિ ।
અમ્બામખમિષં કૃત્વા કુરુ યજ્ઞં નૃપોત્તમ ॥ ૪૫॥

સર્પસત્રં મહારાજ પિતુર્વૈરમનુસ્મરન્ ।
સૂત ઉવાચ ।

ઇતિ તસ્ય વચઃ શ્રુત્વા રાજા જન્મેજયસ્તદા ॥ ૪૬॥

નેત્રાભ્યામશ્રુપાતં ચ ચકારાતીવ દુઃખિતઃ ।
ધિઙ્મામસ્તુ સુદુર્બુદ્ધેર્વૃથા માનકરસ્ય વૈ ॥ ૪૭॥

પિતા યસ્ય ગતિં ઘોરાં પ્રાપ્તઃ પન્નગપીડિતઃ ।
અદ્યાહં મખમારભ્ય કરોમ્યપચિતિં પિતુઃ ॥ ૪૮॥

હત્વા સર્પાનસન્દિગ્ધો દીપ્યમાને વિભાવસૌ ।
આહૂય મન્ત્રિણઃ સર્વાન્ રાજા વચનમબ્રવીત્ ॥ ૪૯॥

કુર્વન્તુ યજ્ઞસમ્ભારં યથાર્હં મન્ત્રિસત્તમાઃ ।
ગઙ્ગાતીરે શુભાં ભૂમિં માપયિત્વા દ્વિજોત્તમૈઃ ॥ ૫૦॥

કુર્વન્તુ મણ્ડપં સ્વસ્થાઃ શતસ્તમ્ભં મનોહરમ્ ।
વેદી યજ્ઞસ્ય કર્તવ્યા મમાદ્ય સચિવાઃ ખલુ ॥ ૫૧॥

તદઙ્ગત્વે વિધેયો વૈ સર્પસત્રઃ સુવિસ્તરઃ ।
તક્ષકસ્તુ પશુસ્તત્ર હોતોત્તઙ્કો મહામુનિઃ ॥ ૫૨॥

શીઘ્રમાહૂયતાં વિપ્રાઃ સર્વજ્ઞા વેદપારગાઃ ।
સૂત ઉવાચ ।
મન્ત્રિણસ્તુ તદા ચક્રુર્ભૂપવાક્યૈર્વિચક્ષણાઃ ॥ ૫૩॥

યજ્ઞસ્ય સર્વસમ્ભારં વેદીં યજ્ઞસ્ય વિસ્તૃતામ્ ।
હવને વર્તમાને તુ સર્પાણાં તક્ષકો ગતઃ ॥ ૫૪॥

ઇન્દ્રં પ્રતિ ભયાર્તોઽહં ત્રાહિ મામિતિ ચાબ્રવીત્ ।
ભયભીતં સમાશ્વાસ્ય સ્વાસને સન્નિવેશ્ય ચ ॥ ૫૫॥

દદાવભયમત્યર્થં નિર્ભયો ભવ પન્નગ ।
તમિન્દ્રશરણં જ્ઞાત્વા મુનિર્દત્તાભયં તથા ॥ ૫૬॥

ઉત્તઙ્કોઽહ્વયદુદ્વિગ્નઃ સેન્દ્રં કૃત્વા નિમન્ત્રણમ્ ।
સ્મૃતસ્તદા તક્ષકેણ યાયાવરકુલોદ્ભવઃ ॥ ૫૭॥

આસ્તીકો નામ ધર્માત્મા જરત્કારુસુતો મુનિઃ ।
તત્રાગત્ય મુનેર્બાલસ્તુષ્ટાવ જનમેજયમ્ ॥ ૫૮॥

રાજા તમર્ચયામાસ દૃષ્ટ્વા બાલં સુપણ્ડિતમ્ ।
અર્ચયિત્વા નૃપસ્તં તુ છન્દયામાસ વાઞ્છિતૈઃ ॥ ૫૯॥

સ તુ વવ્રે મહાભાગ યજ્ઞોઽયં વિરમત્વિતિ ।
સત્યબદ્ધો નૃપસ્તેન પ્રાર્થિતશ્ચ પુનસ્તથા ॥ ૬૦॥

હોમં નિવર્તયામાસ સર્પાણાં મુનિવાક્યતઃ ।
ભારતં શ્રાવયામાસ વૈશમ્પાયન વિસ્તરાત્ ॥ ૬૧॥

શ્રુત્વાપિ નૃપતિઃ કામં ન શાન્તિમભિજગ્મિવાન્ ।
વ્યાસં પપ્રચ્છ ભૂપાલો મમ શાન્તિઃ કથં ભવેત્ ॥ ૬૨॥

મનોઽતિદહ્યતે કામં કિં કરોમિ વદસ્વ મે ।
પિતા મે દુર્ભગસ્યૈવ મૃતઃ પાર્થસુતાત્મજઃ ॥ ૬૩॥

ક્ષત્રિયાણાં મહાભાગ સઙ્ગ્રામે મરણં વરમ્ ।
રણે વા મરણં વ્યાસ ગૃહે વા વિધિપૂર્વકમ્ ॥ ૬૪॥

મરણં ન પિતુર્મેઽભૂદન્તરિક્ષે મૃતોઽવશઃ ।
શાન્ત્યુપાયં વદસ્વાત્ર ત્વં ચ સત્યવતીસુત ॥ ૬૫॥

યથા સ્વર્ગં વ્રજેદાશુ પિતા મે દુર્ગતિં ગતઃ ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે સર્પસત્રવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૧૧॥

## ૨.૧૨ દ્વાદશોઽધ્યાયઃ । શ્રોતૃપ્રવક્તૃપ્રસઙ્ગઃ ।

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય વ્યાસઃ સત્યવતીસુતઃ ।
ઉવાચ વચનં તત્ર સભાયાં નૃપતિં ચ તમ્ ॥ ૧॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ પુરાણં ગુહ્યમદ્ભુતમ્ ।
પુણ્યં ભાગવતં નામ નાનાખ્યાનયુતં શિવમ્ ॥ ૨॥

અધ્યાપિતં મયા પૂર્વં શુકાયાત્મસુતાય વૈ ।
શ્રાવયામિ નૃપ ત્વાં હિ રહસ્યં પરમં મમ ॥ ૩॥

ધર્માર્થકામમોક્ષાણાં કારણં શ્રવણાત્કિલ ।
શુભદ સુખદં નિત્યં સર્વાગમસમુદ્ધૃતમ્ ॥ ૪॥

જનમેજય ઉવાચ ।
આસ્તીકોઽયં સુતઃ કસ્ય વિદ્વાર્થં કથમાગતઃ ।
પ્રયોજનં કિમત્રાસ્ય સર્પાણાં રક્ષણે પ્રભો ॥ ૫॥

કથયૈતન્મહાભાગ વિસ્તરેણ કથાનકમ્ ।
પુરાણં ચ તથા સર્વં વિસ્તરાદ્વદ સુવ્રત ॥ ૬॥

વ્યાસ ઉવાચ ।
જરત્કારુર્મુનિઃ શાન્તો ન ચકાર ગૃહાશ્રમમ્ ।
તેન દૃષ્ટા વને ગર્તે લમ્બમાના સ્વપૂર્વજાઃ ॥ ૭॥

તતસ્તમાહુઃ કુરુ પુત્ર દારા-
ન્યથા ચ નઃ સ્યાત્પરમા હિ તૃપ્તિઃ ।
સ્વર્ગે વ્રજામઃ ખલુ દુઃખમુક્તા
વયં સદાચારયુતે સુતે વૈ ॥ ૮॥

સ તાનુવાચાથ લભે સમાના-
મયાચિતાં ચાતિવશાનુગાં ચ ।
તદા ગૃહારમ્ભમહં કરોમિ
બ્રવીમિ તથ્યં મમ પૂર્વજા વૈ ॥ ૯॥

ઇત્યુક્ત્વા તાઞ્જરત્કારુર્ગતસ્તીર્થાન્પ્રતિ દ્વિજઃ ।
તદૈવ પન્નગાઃ શપ્તા માત્રાગ્નૌ નિપતન્ત્વિતિ ॥ ૧૦॥

કશ્યપસ્ય મુનેઃ પત્ન્યૌ કદ્રૂશ્ચ વિનતા તથા ।
દૃષ્ટ્વાદિત્યરથે ચાશ્વમૂચતુશ્ચ પરસ્પરમ્ ॥ ૧૧॥

તં દૃષ્ટ્વા ચ તદા કદ્રૂર્વિનતામિદમબ્રવીત્ ।
કિંવર્ણોઽયં હયો ભદ્રે સત્યં પ્રબ્રૂહિ માચિરમ્ ॥ ૧૨॥

વિનતોવાચ ।
શ્વેત એવાશ્વરાજોઽયં કિં વા ત્વં મન્યસે શુભે ।
બ્રૂહિ વર્ણં ત્વમપ્યસ્ય તતસ્તુ વિપણાવહે ॥ ૧૩॥

કદ્રુરુવાચ ।
કૃષ્ણવર્ણમહં મન્યે હયમેનં શુચિસ્મિતે ।
એહિ સાર્ધં મયા દિવ્યં દાસીભાવાય ભામિનિ ॥ ૧૪॥

સૂત ઉવાચ ।

કદ્રૂશ્ચ સ્વસુતાનાહ સર્વાન્સર્પાન્વશે સ્થિતાન્ ।
બાલાઞ્છ્યામાન્પ્રકુર્વન્તુ યાવતોઽશ્વશરીરકે ॥ ૧૫॥

નેતિ કેચન તત્રાહુસ્તાનથાસૌ શશાપ હ ।
જનમેજયસ્ય યજ્ઞે વૈ ગમિષ્યથ હુતાશનમ્ ॥ ૧૬॥

અન્યે ચક્રુર્હયં સર્પાઃ કર્બુરં વર્ણભોગકૈઃ ।
વેષ્ટયિત્વાસ્ય પુચ્છં તુ માતુઃ પ્રિયચિકીર્ષયા ॥ ૧૭॥

ભગિન્યૌ ચ સુસંયુક્તે ગત્વા દદૃશતુર્હયમ્ ।
કર્બુરં તં હયં દૃષ્ટ્વા વિનતા ચાતિદુઃખિતા ॥ ૧૮॥

તદાજગામ ગરુડઃ સુતસ્તસ્યા મહાબલઃ ।
સ દૃષ્ટ્વા માતરં દીનામપૃચ્છત્પન્નગાશનઃ ॥ ૧૯॥

માતઃ કથં સુદીનાસિ રુદિતેવ વિભાસિ મે ।
જીવમાને મયિ સુતે તથાન્યે રવિસારથૌ ॥ ૨૦॥

દુઃખિતાસિ તતો વાં ધિગ્જીવિતં ચારુલોચને ।
કિં જાતેન સુતેનાથ યદિ માતા સુદુઃખિતા ॥ ૨૧॥

શંસ મે કારણં માતઃ કરોમિ વિગતજ્વરામ્ ।
વિનતોવાચ ।
સપત્ન્યા દાસ્યહં પુત્ર કિં બ્રવીમિ વૃથા ક્ષતા ॥ ૨૨॥

વહ માં સા બ્રવીત્યદ્ય તેનાસ્મિ દુઃખિતા સુત ।
ગરુડ ઉવાચ ।
વહિષ્યેઽહં તત્ર કિલ યત્ર સા ગન્તુમુત્સુકા ॥ ૨૩॥

મા શોકં કુરુ કલ્યાણિ નિશ્ચિન્તાં ત્વાં કરોમ્યહમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા સા ગતા પાર્શ્વં કદ્રોશ્ચ વિનતા તદા ॥ ૨૪॥

દાસીભાવમપાકર્તું ગરુડોઽપિ મહાબલઃ ।
ઉવાહ તાં સપુત્રાં વૈ સિન્ધોઃ પારં જગામ હ ॥ ૨૫॥

ગત્વા તાં ગરુડઃ પ્રાહ બ્રૂહિ માતર્નમોઽસ્તુ તે ।
કથં મુચ્યેત મે માતા દાસીભાવાદસંશયમ્ ॥ ૨૬॥

કદ્રૂરુવાચ ।

અમૃતં દેવલોકાત્ત્વં બલાદાનીય મે સુતાન્ ।
સમર્પય સુતાદ્યાશુ માતરં મોચયાબલામ્ ॥ ૨૭॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તઃ પ્રયયૌ શીઘ્રમિન્દ્રલોકં મહાબલઃ ।
કૃત્વા યુદ્ધં જહારાશુ સુધાકુમ્ભં ખગોત્તમઃ ॥ ૨૮॥

સમાનીયામૃતં માત્રે વૈનતેયઃ સમર્પયત્ ।
મોચિતા વિનતા તેન દાસીભાવાદસંશયમ્ ॥ ૨૯॥

અમૃતં સઞ્જહારેન્દ્રઃ સ્નાતું સર્પા યદા ગતાઃ ।
દાસીભાવાદ્વિનિર્મુક્તા વિનતા વિપતેર્બલાત્ ॥ ૩૦॥

તત્રાસ્તીર્ણાઃ કુશાસ્તૈસ્તુ લીઢાઃ પન્નગનામકૈઃ ।
દ્વિજિહ્વાસ્તે સુસમ્પન્નાઃ કુશાગ્રસ્પર્શમાત્રતઃ ॥ ૩૧॥

માત્રા શપ્તાશ્ચ યે નાગા વાસુકિપ્રમુખાઃ શુચા ।
બ્રહ્માણં શરણં ગત્વા તે હોચુઃ શાપજં ભયમ્ ॥ ૩૨॥

તાનાહ ભગવાન્બ્રહ્મા જરત્કારુર્મહામુનિઃ ।
વાસુકેર્ભગિનીં તસ્મૈ અર્પયધ્વં સનામિકામ્ ॥ ૩૩॥

તસ્યાં યો જાયતે પુત્રઃ સ વસ્ત્રાતા ભવિષ્યતિ ।
આસ્તીક ઇતિ નામાસૌ ભવિતા નાત્ર સંશયઃ ॥ ૩૪॥

વાસુકિસ્તુ તદાકર્ણ્ય વચનં બ્રહ્મણઃ શિવમ્ ।
વનં ગત્વા સુતાં તસ્મૈ દદૌ વિનયપૂર્વકમ્ ॥ ૩૫॥

સનામાં તાં મુનિર્જ્ઞાત્વા જરત્કારુરુવાચ તમ્ ।
અપ્રિયં મે યદા કુર્યાત્તદા તાં સન્ત્યજામ્યહમ્ ॥ ૩૬॥

વાગ્બન્ધં તાદૃશં કૃત્વા મુનિર્જગ્રાહ તાં સ્વયમ્ ।
દત્ત્વા ચ વાસુકિઃ કામં ભવનં સ્વં જગામ હ ॥ ૩૭॥

કૃત્વા પર્ણકુટીં શુભ્રાં જરત્કારુર્મહાવને ।
તયા સહ સુખં પ્રાપ રમમાણઃ પરન્તપ ॥ ૩૮॥

એકદા ભોજનં કૃત્વા સુપ્તોઽસૌ મુનિસત્તમઃ ।
ભગિની વાસુકેસ્તત્ર સંસ્થિતા વરવર્ણિની ॥ ૩૯॥

ન સમ્બોધયિતવ્યોઽહં ત્વયા કાન્તે કથઞ્ચન ।

ઇત્યુક્ત્વા તુ ગતો નિદ્રાં મુનિસ્તાં સુદતીં તદા ॥ ૪૦॥

રવિરસ્તગિરિં પ્રાપ્તઃ સન્ધ્યાકાલ ઉપસ્થિતે ।
કિં કરોમિ ન મે શાન્તિસ્ત્યજેન્માં બોધિતઃ પુનઃ ॥ ૪૧॥

ધર્મલોપભયાદ્ભીતા જરત્કારુરચિન્તયત્ ।
નોચેત્પ્રબોધયામ્યેનં સન્ધ્યાકાલો વૃથા વ્રજેત્ ॥ ૪૨॥

ધર્મનાશાદ્વરં ત્યાગસ્તથાપિ મરણં ધ્રુવમ્ ।
ધર્મહાનિર્નરાણાં હિ નરકાય ભવેત્પુનઃ ॥ ૪૩॥

ઇતિ સઞ્ચિન્ત્ય સા બાલા તં મુનિં પ્રત્યબોધયત્ ।
સન્ધ્યાકાલોઽપિ સઞ્જાત ઉત્તિષ્ઠોત્તિષ્ઠસુવ્રત ॥ ૪૪॥

ઉત્થિતોઽસૌ મુનિઃ કોપાત્તામુવાચ વ્રજામ્યહમ્ ।
ત્વં તુ ભ્રાતૃગૃહં યાહિ નિદ્રાવિચ્છેદકારિણી ॥ ૪૫॥

વેપમાનાબ્રવીદ્વાક્યમિત્યુક્તા મુનિના તદા ।
ભ્રાત્રા દત્તા યદર્થં તત્કથં સ્યાદમિતપ્રભ ॥ ૪૬॥

મુનિઃ પ્રાહ જરત્કારું તદસ્તીતિ નિરાકુલઃ ।
ગતા સા મુનિના ત્યક્તા વાસુકેઃ સદનં તદા ॥ ૪૭॥

પૃષ્ટા ભ્રાત્રાબ્રવીદ્વાક્યં યથોક્તં પતિના તદા ।
અસ્તીત્યુક્ત્વા ચ હિત્વા માં ગતોઽસૌ મુનિસત્તમઃ ॥ ૪૮॥

વાસુકિસ્તુ તદાકર્ણ્ય સત્યાવાઙ્મુનિરિત્યુત ।
વિશ્વાસં ચ પરં કૃત્વા ભગિનીં તાં સમાશ્રયત્ ॥ ૪૯॥

તતઃ કાલેન કિયતા જાતોઽસૌ મુનિબાલકઃ ।
આસ્તીક ઇતિ નામાસૌ વિખ્યાતઃ કુરુસત્તમ ॥ ૫૦॥

તેનાયં રક્ષિતો યજ્ઞસ્તવ પાર્થિવસત્તમ ।
માતૃપક્ષસ્ય રક્ષાર્થં મુનિના ભાવિતાત્મના ॥ ૫૧॥

ભવ્યં કૃતં મહારાજ માનિતોઽયં ત્વયા મુનિઃ ।
યાયાવરકુલોત્પનો વાસુકેર્ભગિનીસુતઃ ॥ ૫૨॥

સ્વસ્તિ તેઽસ્તુ મહાબાહો ભારતં સકલં શ્રુતમ્ ।
દાનાનિ બહુ દત્તાનિ પૂજિતા મુનયસ્તથા ॥ ૫૩॥

કૃતેન સુકૃતેનાપિ ન પિતા સ્વર્ગતિં ગતઃ ।
પાવિતં ન કુલં કૃત્સ્નં ત્વયા ભૂપતિસત્તમ ॥ ૫૪॥

દેવ્યાશ્ચાયતનં ભૂપ વિસ્તીર્ણં કુરુ ભક્તિતઃ ।
યેન વૈ સકલા સિદ્ધિસ્તવ સ્યાજ્જનમેજય ॥ ૫૫॥

પૂજિતા પરયા ભક્ત્યા શિવા સકલદા સદા ।
કુલવૃદ્ધિં કરોત્યેવ રાજ્યં ચ સુસ્થિરં સદા ॥ ૫૬॥

દેવીમખં વિધાનેન કૃત્વા પાર્થિવસત્તમ ।
શ્રીમદ્ભાગવતં નામ પુરાણં પરમં શ‍ૃણુ ॥ ૫૭॥

ત્વામહં શ્રાવયિષ્યામિ કથાં પરમપાવનીમ્ ।
સંસારતારિણીં દિવ્યાં નાનારસસમાહૃતામ્ ॥ ૫૮॥

ન શ્રોતવ્યં પરં ચાસ્માત્પુરાણાદ્વિદ્યતે ભુવિ ।
નારાધ્યં વિદ્યતે રાજન્દેવીપાદામ્બુજાદૃતે ॥ ૫૯॥

તે સભાગ્યાઃ કૃતપ્રજ્ઞા ધન્યાસ્તે નૃપસત્તમ ।
યેષાં ચિત્તે સદા દેવી વસતિ પ્રેમસઙ્કુલે ॥ ૬૦॥

સુદુઃખિતાસ્તે દૃશ્યન્તે ભુવિ ભારત ભારતે ।
નારાધિતા મહામાયા યૈર્જનૈશ્ચ સદામ્બિકા ॥ ૬૧॥

બ્રહ્માદયઃ સુરાઃ સર્વે યદારાધનતત્પરાઃ ।
વર્તન્તે સર્વદા રાજંસ્તાં ન સેવેત કો જનઃ ॥ ૬૨॥

ય ઇદં શ‍ૃણુયાન્નિત્યં સર્વાન્કામાનવાપ્નુયાત્ ।
ભગવત્યા સમાખ્યાતં વિષ્ણવે યદનુત્તમમ્ ॥ ૬૩॥

તેન શ્રુતેન તે રાજંશ્ચિત્તે શાન્તિર્ભવિષ્યતિ ।
પિતૃણાં ચાક્ષયઃ સ્વર્ગઃ પુરાણશ્રવણાદ્ભવેત્ ॥ ૬૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
દ્વિતીયસ્કન્ધે શ્રોતૃપ્રવક્તૃપ્રસઙ્ગો નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૧૨॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે દ્વિતીયસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*2 Shrimaddevibhagavatamahapurane Dvitiyah Skandhah*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*